विशेषार्थ—जो वस्तुओंके यथार्थ दोषोंको जानता है उसे दोषज्ञ अर्थात् विद्वान् कहते हैं। यह बात प्रसिद्ध है। संस्कृत अमरकोशमें लिखा है—'विद्वान् विपश्चिद् दोषज्ञः' [२।७।५] अर्थात् विद्वान्, विपश्चिद्, दोषज्ञ ये विद्वान् पण्डितके नाम हैं। ग्रन्थकारका कहना है कि सभी दूषित वस्तुओंके दोषोंको जानकर भी यदि स्त्रीके दोषोंको नहीं जानता तो वह विद्वान् नहीं है। किन्तु जो अन्य वस्तुओंके दोषोंको जानकर या नहीं जानकर भी यदि स्त्रीके दोषोंको जानता है तो वह विद्वान् है ॥७२॥

अथ स्त्रीणा निसर्गवञ्चकत्वेन दु खैककारणत्वमुपदर्शयन् लोकस्य ततः स्वतश्च मुग्धत्वमुद्भावयति—

लोकः किन्नु विदग्धः किं विधिदग्धः स्त्रियं सुखाङ्गेषु ।
यद्धुरि रेखयति मुहुर्विश्रम्भं कृन्ततीमपि निकृत्या ॥७३॥

३

विधिदग्धः—दैवेन प्लुष्ट मतिभ्रष्टः कृत. । अथवा विधिर्विहिताचरणं दग्धोऽस्येति ग्राह्यम् । रेखयति—रेखायता करोति गणयतीत्यर्थः । निकृत्या—वञ्चनया ॥७३॥

६

अथ स्त्रीचरित्रं योगिनामपि दुर्लक्षमिति लक्षयति—

परं सूक्ष्ममपि ब्रह्म परं पश्यन्ति योगिनः ।
न तु स्त्रीचरितं विश्वमतद्विद्यं कुतोऽन्यथा ॥७४॥

९

अतद्विद्यं—स्त्रीचरितज्ञानशून्यं महर्षिज्ञानपूर्वकत्वात् सर्वविद्यानाम् । श्लोक.—

'मायागेहं (ससन्देह) नृशस बहुसाहसम् ।
कामार्षे[1]. स्त्रीमनोलक्ष्यमलक्ष्यं योगिनामपि ॥' [ ] ॥७४॥

अथ स्त्रीणा दम्भादिदोषभूयिष्ठतया नरकमार्गाग्रेसरत्वं निवेदयन् दुर्दैवस्य तत्पथप्रस्थानसूत्रधारता प्रत्याचष्टे—

१२

दोषा दम्भतमस्सु वैरगरलव्याली मृषोद्यातडिन्-
मेघाळी कलहाम्बुवाहपटलप्रावृड् वृषौजोज्वरः ।
कन्दर्पज्वररुद्रभालदृगसत्कर्मोर्मिमालानदी,
स्त्री श्वभ्राध्वपुरःसरी यदि नृणां दुर्दैव किं ताम्यसि ॥७५॥

१५

आगे कहते हैं—स्त्रियाँ स्वभावसे ही ठक विद्यामें कुशल होनेसे एकमात्र दुःखकी ही कारण होती हैं फिर भी लोग उनके विषयमें सदा मूढ़ ही बने रहते हैं—

पता नहीं, संसारके प्राणी क्या व्यवहारचतुर हैं या दैवने उनकी मति भ्रष्ट कर दी है जो वे छलसे बार-बार विश्वासघात करनेवाली भी स्त्रीको सुखके साधनोंमें सबसे प्रथम स्थान देते हैं ॥७३॥

विशेषार्थ—विदग्धका अर्थ चतुर भी होता है और वि—विशेषरूपसे दग्ध अर्थात् अभागा भी होता है। उसीको लेकर ग्रन्थकारने लोगोंके साथ व्यंग किया है कि वे चतुर हैं या अभागे हैं ?

आगे कहते हैं कि स्त्रीका चरित्र योगियोंके लिए भी अगम्य है—

योगिजन अत्यन्त सूक्ष्म भी परम ब्रह्मको स्वसंवेदन प्रत्यक्षसे जान लेते हैं किन्तु स्त्रीके चरितको नहीं जानते। यदि जानते तो यह विश्व स्त्रीचरितके ज्ञानसे शून्य क्यों रहता ? अर्थात् इस विश्वको जो भी ज्ञान प्राप्त हुआ है वह योगियोंके द्वारा ही प्राप्त हुआ है। यतः संसार स्त्रीचरितको नहीं जानता। अत. प्रतीत होता है कि योगियोंको भी स्त्रीचरितका ज्ञान नहीं था ॥७४॥

आगे मायाचार आदि दोषोंकी बहुलताके कारण स्त्रियोंको नरकके मार्गका अग्रेसर बतलाते हुए दुर्दैवके नरकके मार्गमें ले जानेकी अगुआईका निराकरण करते हैं—

जो मायारूपी अन्धकारके प्रसारके लिए रात्रि है, वैररूपी विषके लिए सर्पिणी है, असत्यवादरूपी बिजलीके लिए मेघमाला है, कलहरूपी मेघोंके पटलके लिए वर्षाऋतु है,

१. कामान्धे भ. कु. च. ।

वृषौजोज्वरः—वृषो धर्मः स एव ओज. शुक्रान्तधातुपरमतेजः ।

'ओजस्तेजोधातूना शुक्रान्ताना परं स्मृतम्'

३ इत्यभिधानात् । तत्र ज्वरसंहर्तृत्वात् । तदुक्तम्—

'ज्वरो रोगपतिः पाप्मा मृत्युरोजोशनान्तकः ।
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः ॥' [अष्टाङ्गहृदय २।१] ॥७५॥

६ अथ स्त्रीणा रागद्वेषयोः परा कोटिमार्ष्टुमुपपत्तिं दर्शयति[1]—

व्यक्तं धात्रा भीरुसर्गविशेषौ रागद्वेषौ विश्वसर्गे विभक्तौ ।
यद्रक्ता स्वानप्यसून् व्येति पुंसे पुंसोऽपि स्त्री हन्त्यसून् द्राग्विरक्ता ॥७६॥

९ व्यक्तं—अहमेव मन्ये । भीरुसर्गः—स्त्रीसृष्टिः । व्येति—विलभते ददातीत्यर्थः ॥७६॥

अथ सुचरिताना सदाचारविशुद्धयर्थं दृष्टान्तमुखेन स्त्रीचरितभावनामुपदिशति—

रक्ता देवरतिं सरित्यवनिपं रक्ताऽक्षिपत् पङ्गुके,
१२ **कान्तं गोपवती द्रवन्तमवधीच्छित्वा सपत्नीशिरः ।**
शूलस्थेन मलिम्लुचेन दलितं स्वोष्ठं किलाख्यत्पति-
च्छिन्नं वीरवतीति चिन्त्यमबलावृत्तं सुवृत्तैः सदा ॥७७॥

१५ रक्ता—राज्ञीसंज्ञेयम् । रक्ता—आसक्ता । द्रवन्तं—पलायमानं । मलिम्लुचेन—अंगारकनाम्ना चौरेण ॥७७॥

धर्मरूपी ओजके विनाशके लिए ज्वर है, कामज्वरके लिए शिवका तीसरा नेत्र है, पापकर्म-रूपी तरंगमालाके लिए नदी है ऐसी स्त्री यदि नरकके मार्गकी अगुआ है तो हे दुर्दैव, तू क्यों वृथा कष्ट उठाता है ? उक्त प्रकारकी नारीसे ही पुरुषोंका नरकमे प्रवेश निश्चित है ॥७५॥

स्त्रियोंमें राग और द्वेषकी चरम सीमा बतलानेके लिए उसकी उपपत्ति दिखाते हैं—

मैं ऐसा मानता हूँ कि सृष्टिको बनानेवालेने रागद्वेषमयी स्त्रीकी रचना करके शेष बचे रागद्वेषको विश्वकी रचनामे विभक्त कर दिया अर्थात् शेषसे विश्वकी रचना की। क्योंकि स्त्री यदि पुरुषसे अनुराग करती है तो उसके लिए धनादिकी तो बात ही क्या, अपने प्राण तक दे डालती है। और यदि द्वेष करती है तो तत्काल ही पुरुषके प्राण भी ले डालती है । इस तरह स्त्रीमे राग और द्वेषकी चरम सीमा है ॥७६॥

सम्यक् चारित्रका पालन करनेवालोंके सदाचारकी विशुद्धिके लिए दृष्टान्त रूपसे स्त्रीचरितकी भावनाका उपदेश देते हैं—

एक पैरहीन पुरुषपर अनुरक्त होकर रक्ता नामकी रानीने अपने पति राजा देवरतिको नदीमें फेंक दिया। गोपवतीने सौतका सिर काटकर भागते हुए पतिको मार डाला। सूलीपर चढ़े हुए अंगारक नामक चोरके द्वारा काटे गये ओष्ठको वीरवतीने अपने पतिके द्वारा काटा हुआ कहा। इस प्रकारके स्त्रीचरित्रका चरित्रवानोंको सदा विचार करना चाहिए ॥७७॥

---

१. -मादेष्टु—भ. कु च. ।

अथ त्रयोदशभिः पद्यैः स्त्रीसंसर्गदोषान् व्याख्यातुकामस्तासामुपपत्तिपूर्वकं दूरपरिहार्यत्वमादावनुशास्ति—

सिद्धिः काऽप्यजितेन्द्रियस्य किल न स्यादित्यनुष्ठीयत,
सुष्ट्वामुत्रिकसिद्धयेऽक्षविजयो दक्षैः स च स्याद् ध्रुवम् ।
चेतः संयमनात्तपः श्रुतवतोऽप्येतच्च तावद् भवेद्,
यावत्पश्यति नाङ्गनामुखमिति त्याज्याः स्त्रियो दूरतः ॥७८॥

३

६

कापि—ऐहिकी पारत्रिकी वा । अङ्गनामुखं—प्रशस्तमङ्गं यस्या साऽङ्गना, तस्या वक्त्रम् । उपपत्तिमात्रार्थमङ्गनाग्रहण स्त्रीमात्रसंसर्गेऽपि सद्वृत्तविप्लवोपलम्भात् । अत एव त्याज्या. स्त्रिय इति सामान्येनोक्तम् ।

'द्वयमेव तप.सिद्धा बुधाः कारणमूचिरे ।
यदनालोकनं स्त्रीणां यच्च संग्लापनं तनोः ॥' [यशस्तिलक १।८१] ॥७८॥

९

विशेषार्थ—भगवती आराधना गा. ९४९, ५०, ५१ में उक्त दृष्टान्त[1] आते हैं । यथा—'साकेत नगरीका राजा देवरति अपनी रानी रक्तामें अति आसक्तिके कारण राज्यसे निकाल दिया गया । मार्गमें रक्ता एक पंगुल गायकपर आसक्त हो गयी और उसने अपने पतिको छलसे नदीमें डुबो दिया ॥ गोपवती बड़ी ईर्ष्यालु थी । उसका पति सिंहबल उससे पीड़ित होकर चला गया और उसने वहाँ अपनी शादी कर ली । गोपवतीने जाकर अपनी सपत्नीका सिर काट लिया । और जब उसका पति लौटकर आया तो उसे भी मार डाला ॥ वीरमती एक चोरपर आसक्त थी । राजाने चोरको सूली दे दी । रातमें उठकर वीरमती चोरसे मिलने गयी और चोरने उसका ओठ काट लिया । दिन निकलने पर उसने हल्ला किया कि मेरे पतिने मेरा ओठ काट लिया । राजाने उसके पतिको प्राणदण्ड दिया । किन्तु पतिके मित्रने यह सब चरित्र देखा था उसने राजासे कहा । तब उसका पति बचा ।' ये तीनों कथाएँ हरिषेण रचित कथाकोशमें क्रमसे ८५, ८६, ८७ नम्बरपर हैं ॥७७॥

आगे ग्रन्थकार तेरह पद्योंसे स्त्री-संसर्गके दोष कहना चाहते हैं । सबसे प्रथम उपपत्तिपूर्वक उन स्त्रियोंको दूरसे ही त्यागनेकी सलाह देते हैं—

आगममें कहा है—जिसकी इन्द्रियाँ उसके वशमें नहीं हैं उसे कोई भी इस लोक सम्बन्धी या परलोक सम्बन्धी इष्ट अर्थकी प्राप्ति नहीं होती । इसलिए परलोकमें अर्थकी सिद्धिके लिए उसके साधनमें तत्पर चतुर मनुष्य अच्छी तरहसे इन्द्रियोंको जीतते हैं । इन्द्रियोंका जय मनके निरोधसे होता है । किन्तु तपस्वी और ज्ञानी पुरुषोंका भी मनोनिरोध तब होता है जब वह स्त्रीका मुख नहीं देखता । अतः मुमुक्षुओंको दूरसे ही स्त्रियोंका त्याग करना चाहिए ॥७८॥

---

१. 'साकेतपुराधिवदी देवरदी रज्ज-सुक्ख-पब्भट्ठो ।
पंगुलहेदुं छूडो णदीए रत्ताए देवीए ॥
ईसालुयाए गोववदीए गामकूटधूदिया सीसं ।
छिण्णं पहदो तध भल्लएण पासम्मि सिहवलो ॥
वीरमदीए सूलगदचोरदट्ठोट्ठिगाय वाणियओ ।
पहदो दत्तो य तहा छिण्णो ओट्ठोत्ति आलविदो' ॥

अथ कामिनीकटाक्षनिरीक्षणादिपरम्परया पुसस्तन्मयत्वपरिणतिमावेदयति—

सुभ्रूविभ्रमसंभ्रमो भ्रमयति स्वान्तं नृणा धूर्तवत्,
तस्माद् व्याधिभरादिवोपरमति व्रीडा ततः शाम्यति ।
शङ्का वह्निरिवोदकात्तत उदेत्यस्यां गुरोः स्वात्मवद्,
विश्वास. प्रणयस्ततो रतिरलं तस्मात्ततस्तल्लयः ॥७९॥

सुभ्रूविभ्रमसभ्रम.—शोभने दर्शनमात्रान्मनोहरणक्षमे भ्रुवौ यस्या. सा सुभ्रूस्तस्या विभ्रमो रागोद्रेकाद् भ्रूपर्यन्तविक्षेप , तत्र सभ्रमो निरीक्षणादर । भ्रमयति—अन्यथावृत्ति करोति व्याकुलयति वा । धूर्तवत्—धत्तूरकोपयोगो यथा । शङ्का—भयम् । 'कामातुराणा न भय न लज्जा' इत्यभिधानात् । गुरो.—अध्यात्मतत्त्वोपदेशकात् । स्वात्मवत्—निजात्मनि यथा ॥७९॥

विशेषार्थ—आचार्य सोमदेवने कहा है—'जिसकी इन्द्रियाँ वशमे नहीं हैं उसका कार्य सिद्ध नहीं होता' । तथा और भी कहा है—'विद्वानोंने तपकी सिद्धिमे दो ही कारण कहे हैं—एक स्त्रियोंको न ताकना और दूसरा शरीरको कृश करना । जिसके अंग सुन्दर होते हैं उसे अगना कहते हैं । अत. 'अंगना' का ग्रहण तो उपपत्ति मात्रके लिए है' । स्त्री मात्रके ससर्गसे भी सदाचारमे गड़बड़ी देखी जाती है ॥७८॥

आगे कहते हैं कि स्त्रीके कटाक्ष आदिको देखते-देखते मनुष्य तन्मय हो जाता है—

जिस स्त्रीकी भौं देखने मात्रसे मनको हर लेती है उसे सुभ्रू कहते हैं । जब वह रागके उद्रेकसे भौं चढाकर दृष्टिपात करती है तो उसको रागपूर्वक देखनेसे मनुष्योंका मन वैसा ही भ्रमित हो जाता है जैसा धतूरा खानेसे होता है । मनके भ्रमित होनेसे वैसे ही लज्जा चली जाती है जैसे रागके आधिक्यमे लज्जा नहीं रहती । लज्जाके चले जानेसे वैसे ही भय चला जाता है जैसे पानीसे आग । कहा भी है कि काम-पीडितोंको न भय रहता है न लज्जा रहती है । भय शान्त हो जानेसे कामीको स्त्रीमे वैसा ही विश्वास उत्पन्न होता है जैसा गुरुके उपदेशसे उसकी अध्यात्मवाणीको सुनकर अपनी आत्मामे श्रद्धा उत्पन्न होती है । और जैसे गुरुके उपदेशसे अपनी आत्मामे रुचि होती है वैसे ही स्त्रीमे विश्वास उत्पन्न होनेसे उससे प्रेमपरिचय होता है तथा जैसे गुरुके उपदेशसे आत्मामे रुचि होनेके बाद आत्म रति होती है वैसे स्त्रीसे प्रेमपरिचय होनेपर रति होती है । और जैसे गुरुके उपदेशसे आत्मरतिके पश्चात् वह आत्मामे लय हो जाता है वैसे ही कामी स्त्री रति होनेपर उसीमे लय हो जाता है ॥७९॥

विशेषार्थ—यहाँ स्त्रीमे विश्वास, प्रणय, रति और लयको क्रमसे आत्मामे विश्वास, प्रणय, रति और लयकी उपमा दी है । दोनों दो छोर हैं—एक रागका है और दूसरा विराग-का । रागकी चरम परिणति स्त्रीके साथ रतिके समयमे होनेवाली तल्लीनता है । उस समय भी यह विवेक नहीं रहता कि यह कौन है, मैं कौन हूँ और यह सब क्या है । इसीसे काव्य-रसिकोंने उसे ब्रह्मानन्द सहोदर कहा है । आचार्य जयसेनने समयसारकी टीकामे सम्यग्-दृष्टिके स्वसवेदनको वीतराग स्वसवेदन कहा है । इसपर-से यह शंका की गयी कि क्या स्वसवेदन सराग भी होता है जो आप स्वसवेदनके साथ वीतराग विशेषण लगाते हैं ? उत्तरमे आचार्यने कहा है कि विषयानन्दके समय होनेवाला स्वसंवेदन सराग है । उसीसे निवृत्तिके लिए वीतराग विशेषण लगाया है । उसी सबको दृष्टिमे रखकर यहाँ ग्रन्थकारने

अथ कामिनीकटाक्षनिरीक्षणस्यापातमात्ररमणीयत्वपरिणामात्यन्तदारुणत्वे वक्रभणित्युपपत्त्या प्रतिपादयति—

चक्षुस्तेजोमयमिति मतेऽप्यन्य एवाग्निरक्ष्णो- ३
रेणाक्षीणां कथमितरथा तत्कटाक्षाः सुधावत् ।
लीढा दृग्भ्यां ध्रुवमपि चरद् विष्वगप्यण्वणीयः,
स्वान्तं पुंसां पविदहनवद्दग्धुमन्तर्ज्वलन्ति ॥८०॥ ६

मते—चक्षुस्तैजसं रश्मिवत्त्वात्प्रदीपवदिति वैशेषिकदर्शने । अपिशब्दादभ्युपगमसिद्धान्ताश्रयणेन विचार्यमाण इति लक्षयति । अन्य एव—भासुररूपोष्णस्पर्शगुणयोगित्वसंयुक्तबाह्यस्थूलस्थिरमूर्तद्रव्यदाहित्वलक्षणादग्नेर्विलक्षण एव । लीढाः—आस्वादिता. । मतर्षमालोकिता इत्यर्थः । ध्रुवमपि—नित्यरूपतयाऽविकार्यमपि । चरद्विष्वगपि—समन्ताद् भ्रमदपि । तदुक्तम्— ९

'क्रियाऽन्यत्र क्रमेण स्यात्, कियत्स्वेव च वस्तुषु ।
जगत्त्रयादपि स्फारा चित्ते तु क्षणतः क्रिया ॥' [सोम उपा ३४५ श्लोक] १२

अण्वणीय.—परमाणोरप्यतिशयेन सूक्ष्मं योगिभिरपि दुर्लक्षत्वात् ॥८०॥

उक्त उपमा दी है ऐसा प्रतीत होता है। पं. आशाधरने टीकामें 'गुरु'का अर्थ अध्यात्म तत्त्वका उपदेशक किया है। अध्यात्म तत्त्वका उपदेश सुने बिना न अपनी आत्माका बोध होता है और न श्रद्धा। श्रद्धाके पश्चात् ही आत्माके प्रति रुचि बढ़ती है। रुचि बढ़ते-बढ़ते रति पैदा हो जाती है। जैसे रागी स्त्रीरतिके लिए घर-द्वार सब भुला बैठता है और स्त्रीके लिए मजनू बन जाता है। वैसे ही आत्मरतिके पीछे मनुष्य विरागी बनकर घर-द्वारको तिलांजलि देकर केवल अपने शरीरके सिवा सब कुछ छोड़कर निकल पड़ता है, वनमें और एकान्तमें आत्मरतिमें निमग्न होकर उसीमें लय हो जाता है। रागी भी यही सब करता है किन्तु अपनेको ही भुला बैठता है वह परके पीछे दीवाना होता है। विरागी 'स्व' के पीछे दीवाना होता है। इतना ही अन्तर है भोगी और योगीमे ॥७९॥

कामिनियोंके कटाक्षका अवलोकन प्रारम्भमें ही मनोरम लगता है किन्तु परिणाममे अत्यन्त भयानक है, यह बात वक्रोक्तिके द्वारा कहते हैं—

चक्षु तैजस है। इस वैशेषिक मतमे भी कामिनियोंके लोचनोंमें भास्वररूप और उष्ण स्पर्श-गुणवाली अग्निसे कोई भिन्न ही आग रहती है। यदि ऐसा न होता तो मनुष्योंके नेत्रोंके द्वारा अमृतकी तरह पान किये गये उनके कटाक्ष मनुष्योंके नित्य और अलात चक्रकी तरह सर्वत्र घूमनेवाले अणुरूप भी मनको वज्राग्निकी तरह जलानेके लिए क्यों आत्माके भीतर प्रज्वलित होते ॥८०॥

विशेषार्थ—वैशेषिक दर्शन चक्षुको तैजस मानता है और तेज अर्थात् अग्नि गर्म होती है, जलाती है। तथा मनको अणुरूप नित्य द्रव्य मानता है। यतः वैशेषिक दर्शनमे आत्मा व्यापक है और मन अणुरूप है अत. मन आत्मासे सम्बद्ध होते हुए अलात चक्रकी तरह घूमता रहता है। यह सब उनकी मान्यता है। उसीको लेकर ग्रन्थकारने व्यंग किया है कि स्त्रियोंके नेत्र भी तैजस हैं किन्तु उनकी विचित्रता यह है कि मनुष्य उन्हें अमृत मानकर अपनी आँखोंसे पी जाते हैं जबकि बाह्य अग्निको पीना सम्भव नहीं है। किन्तु पीनेके बाद मनुष्यका मन कामिनीके वियोगमे जला करता है अत कामिनीकी आँखोंमे इस बाह्य आगसे भिन्न कोई दूसरी ही आग बसती है ऐसा लगता है ॥८०॥

अथ कामिन्याः कटाक्षनिरीक्षणद्वारेण तत्क्षणान्नरहृदये स्वरूपाभिव्यक्तिकर्तृत्वशक्तिं विदग्धोक्त्या प्रकटयति—

३ हृद्यभिव्यञ्जती सद्यः स्वं पुंसोऽपाङ्गवल्गितैः ।
सत्कार्यवादमाहृत्य कान्ता सत्यापयत्यहो ॥८१॥

सत्कार्यवादं—

६ असदकरणादुपादानग्रहणात् सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥' [साख्यका. ९]

इति साख्यमतम् । आहृत्य—हठात् न प्रमाणबलात् । सत्यापयति—सत्यं करोति । अहो—
९ कष्टमाश्चर्यं वा ॥८१॥

अथ कामिनीकटाक्षनिरीक्षणपराणां युक्तायुक्तविवेचनशून्यता प्रभूता भवानुबन्धिनी वक्रभणित्योपपादयति—

१२ नूनं नृणां हृदि जवान्निपतन्नपाङ्गः
स्त्रीणां विषं वमति किञ्चिदचिन्त्यशक्ति ।
नो चेत्कथं गलितसद्गुरुवाक्यमन्त्रा
१५ जन्मान्तरेष्वपि चकास्ति न चेतनान्तः ॥८२॥

गलितः—प्रच्युतो भ्रष्टप्रभावो वा जातः ॥८२॥

कटाक्ष निरीक्षणके द्वारा तत्काल ही मनुष्यके हृदयमें अपने स्वरूपको अभिव्यक्त करनेकी शक्ति कामिनीमें है यह बात विदग्धोक्तिके द्वारा बतलाते हैं—

यह बडा खेद अथवा आश्चर्य है कि अपने नेत्रोंके कटाक्षोंके द्वारा पुरुषके हृदयमें अपनेको अभिव्यक्त करती हुई कामिनी बिना प्रमाणके ही बलपूर्वक सांख्यके सत्कार्यवादको सत्य सिद्ध करती है ॥८१॥

विशेषार्थ—सांख्यदर्शन कार्यकी उत्पत्ति और विनाश नहीं मानता, आविर्भाव और तिरोभाव मानता है। उसका मत है कि कारणमें कार्य पहलेसे ही वर्तमान रहता है, बाह्य सामग्री उसे व्यक्त करती है। उसका कहना है कि असत्की उत्पत्ति नहीं होती, कार्यके लिए उसके उपादानको ही ग्रहण किया जाता है जैसे घटके लिए मिट्टी ही ली जाती है, सबसे सबकी उत्पत्ति नहीं होती, निश्चित कारणसे ही निश्चित कार्यकी उत्पत्ति होती है, जो कारण जिस कार्यको करनेमें समर्थ होता है वह अपने शक्य कार्यको ही करता है तथा कारणपना भी तभी बनता है जब कार्य सद्रूप है अतः कार्य सद्रूप ही है। इसी सिद्धान्तको लेकर ग्रन्थकार कहते हैं—कामी मनुष्य स्त्रीको देखते ही उसके ध्यानमें तन्मय हो जाता है इससे सांख्यका सत्कार्यवाद बिना युक्तिके भी स्त्री सिद्ध कर देती है ॥८१॥

जो मनुष्य कामिनियोंके कटाक्षका निरीक्षण करनेमे तत्पर रहते हैं वे अनेक भवों तक युक्तायुक्तके विचारसे शून्य हो जाते हैं यह बात वक्रोक्तिके द्वारा कहते हैं—

मैं ऐसा मानता हूँ कि मनुष्योंके हृदयमें चक्षुके द्वारा प्रतिफलित स्त्रियोंका कटाक्ष एक अलौकिक विषको उगलता है जिसकी शक्ति विचारसे परे है। यदि ऐसा न होता तो उसी भवमे ही नहीं, किन्तु अन्य भवोंमे भी उसमे चेतनाका विकास क्यों नहीं होता और क्यों सद्गुरुओंके वचनरूपी मन्त्र अपना प्रभाव नहीं डालते ॥८२॥

अथ संयमसेविनां चित्तं येन तेन निरीक्षणवचनादिप्रकारेणान्तर्निपत्य स्त्रिया विकार्यमाणं दुःशकप्रतीकारं भवतीति भीत्युत्पादनमुखेन सुतरां तत्परिहारे तान् जागरयति—

चित्रमेकगुणस्नेहमपि संयमिनां मनः । ३
यथा तथा प्रविश्य स्त्री करोति स्वमयं क्षणात् ॥८३॥

एकगुणस्नेहं—उत्कृष्टगुणानुरागमेकत्वरसिकं वा विरोधाभासपक्षे तु 'न जघन्यगुणानाम्' इत्यभिधानात् एकगुणस्नेहस्य केनापि सह संबन्धो न स्यादिति द्रष्टव्यम् ॥८३॥ ६

अथाल्पशोऽपि स्त्रीसम्पर्कः संयतस्य स्वार्थभ्रंशं करोतीति शिक्षार्थमाह—

कणिकामपि कर्कट्या गन्धमात्रमपि स्त्रियाः ।
स्वादुशुद्धां मुनेश्चित्तवृत्तिं व्यर्थीकरोत्यरम् ॥८४॥ ९

अल्पमप्यालोकनस्पर्शनवचनादिकं पक्षे घ्राणग्राह्यो गुणो गन्धः । पक्षद्वयेऽप्यसावेव वा । स्वादु शुद्धां—सानन्दवीतरागां मधुरशुभ्रां च । व्यर्थीकरोति—विगतो विरुद्धो वाऽर्थः प्रयोजनं कर्मक्षपणं मण्डकाद्युत्पादश्च यस्याः सा व्यर्था ॥८४॥ १२

अथ स्त्रीसांगत्यदोषं दृष्टान्तेन स्पष्टयन्नाह—

विशेषार्थ—सच्चे मान्त्रिकोंके मन्त्रोंके प्रभावसे सर्प-विष उतर जाता है और मनुष्य होशमें आ जाता है किन्तु स्त्रीके कटाक्षरूपी सर्पसे डँसा हुआ मनुष्य भव-भवमें ज्ञानशून्य बना रहता है, उसपर सच्चे गुरुओंके उपदेशका भी कोई प्रभाव नहीं पड़ता ॥८२॥

संयमका पालन करनेवाले संयमियोंका मन भी अवलोकन-भाषण आदि किसी भी प्रकारसे भीतर घुसकर स्त्रियाँ ऐसा विकृत कर देती हैं कि उसका प्रतीकार बहुत ही कठिन हो जाता है। इस प्रकारका भय उत्पन्न करके उनका बहुत ही उचित परिहार करनेके लिए सावधान करते हैं—

संयमियोंका मन एकगुणस्नेह है फिर भी आश्चर्य है कि स्त्री जिस-किसी तरह उसमें प्रवेश करके क्षणभरमें ही अपने रूप कर लेती है ॥८३॥

विशेषार्थ—संयमियोंके मनमें सम्यग्दर्शनादि गुणोंमें उत्कृष्ट अनुराग होता है अथवा वे आत्माके एकत्वके रसिक होते हैं इसलिए उनके मनको 'एकगुणस्नेह' कहा है। यह तो यथार्थ ही है इसमें कोई आश्चर्यकी बात नहीं है। किन्तु तत्त्वार्थ सूत्रके पाँचवे अध्यायमें कहा है—'न जघन्य गुणानाम्'। जघन्य अर्थात् एक स्निग्ध या रूक्ष गुणवाले परमाणुका बन्ध नहीं होता। और संयमीका मन एकगुणस्नेहवाला है फिर भी उसको स्त्री अपने रूप कर लेती है, यही आश्चर्य है। इसे साहित्यमें विरोधाभास नामक अलंकार कहते हैं ॥८३॥

आगे शिक्षा देते हैं कि थोड़ा-सा भी स्त्री-सम्पर्क संयमीके स्वार्थका विनाश कर देता है—

जैसे कर्कटीकी गन्धमात्र गेहूँके स्वादु और शुद्ध आटेको व्यर्थ कर देती है फिर उससे स्वादिष्ट मण्डे आदि नहीं बन सकते। उसी तरह स्त्रीकी गन्धमात्र भी—उसका देखना, स्पर्शन और वचन मात्र भी मुनिकी सानन्द वीतराग चित्तवृत्तिको तत्काल ही व्यर्थ कर देती है। फिर उससे कर्मोंका क्षपणरूप कार्य नहीं होता ॥८४॥

स्त्रीसंगतिके दोषोंको दृष्टान्त द्वारा स्पष्ट करते हैं—

सत्त्वं रेतश्छलात् पुंसां घृतवद् द्रवति द्रुतम् ।
विवेकः सूतवत्क्वापि याति योषाग्नियोगतः ॥८५॥

३　सत्त्व—मनोगुण. । द्रवति—विलीयते ॥८५॥

अथ कामिनीचेष्टाविशेषो महामोहावेशं करोतीति वक्रभणितया बोधयति—

वैदग्धीमयनर्मवक्रिमचमत्कारक्षरत्स्वादिमाः
६　सभ्रूलास्यरसाः स्मितद्युतिकिरो दूरे गिरः सुभ्रुवाम् ।
तच्छ्रोणिस्तनभारमन्थरगमोद्दामक्वणन्मेखला,
मञ्जीराकुलितोऽपि मङ्क्षु निपतेन्मोहान्धकूपे न कः ॥८६॥

९　वैदग्धी—रसिकचेष्टा । स्वादिमा—माधुर्यम् । लास्य—मसृणनृत्यम् । स्मितद्युतिकिरः—ईषद्धसितकान्तिप्रस्तारिण्य ॥८६॥

अथ स्त्रीसकथादोष कथयति—

१२　सम्यग्योगाग्निना रागरसो भस्मीकृतोऽप्यहो ।
उज्जीवति पुनः साधोः स्त्रीवाक्सिद्धौषधीबलात् ॥८७॥

योग.—समाधि प्रयोगश्च । रस'—पारद. ॥८७॥

१५　अथोत्तमस्त्रीपरिरम्भानुभावं भावयति—

पश्चाद् बहिर्वरारोहादोःपाशेन तनीयसा ।
बध्यतेऽन्तः पुमान् पूर्वं मोहपाशेन भूयसा ॥८८॥

स्त्री अग्निके तुल्य है। जैसे अग्निके सम्पर्कसे तत्काल घी पिघलता है और पारा उड़ जाता है वैसे ही स्त्रीके सम्पर्कसे मनुष्योंका मनोगुण सत्त्व वीर्यके छलसे विलीन हो जाता है और युक्त-अयुक्तका विचारज्ञान न जाने कहाँ चला जाता है ॥८५॥

कामिनियोंकी विशेष चेष्टाएँ महामोहके आवेशको उत्पन्न करती हैं यह बात वक्रोक्तिके द्वारा समझाते हैं—

रसिक चेष्टामय परिहास और कुटिलतासे आश्चर्यके आवेशमें माधुर्यको बहानेवाली, भ्रकुटियोंके कोमल नर्तनके रससे युक्त और मन्द-मन्द मुसकराहटकी किरणोंको इधर-उधर बिखेरनेवाली, कामिनियोंकी वाणीसे तो दूर ही रहो, वे तो मोक्षमार्गकी अत्यन्त प्रतिबन्धिनी हैं ही, उनके कटि और स्तनके भारसे मन्द-मन्द गमन करनेसे बेरोक शब्द करनेवाली करधनी और पायलोंसे आकुल हुआ कौन मनुष्य तत्काल ही मोहरूपी अन्धकूपमें नहीं गिरता। अर्थात् मुमुक्षुको स्त्रीसे वार्तालाप तो दूर, उनके शब्द-श्रवणसे भी बचना चाहिए ॥८६॥

स्त्रियोंसे वार्तालाप करनेके दोष बतलाते हैं—

आश्चर्य है कि जैसे अग्निसे भस्म हुआ भी पारा उसको जिलानेमें समर्थ औषधिके बलसे पुनः उज्जीवित हो जाता है वैसे ही समीचीन समाधिके द्वारा भस्म कर दिया गया भी साधुका राग स्त्रीके साथ बातचीत करनेसे पुन उज्जीवित हो जाता है ॥८७॥

कामिनीके आलिंगनका प्रभाव बतलाते हैं—

पहले तो पुरुष अपनी आत्मामें बड़े भारी मोहपाशसे बँधता है। मोहपाशसे बँधनेके पश्चात बादमें सुन्दर स्त्रीके कोमल बाहुपाशसे बँधता है। अर्थात अन्तरंगमें मोहका उदय

वरारोहा—वर उत्कृष्ट आरोहो नितम्बोऽस्या असौ, उत्तमस्त्रीत्यर्थः। भूयसा—बहुतरेण ॥८८॥

अथ स्त्रीदृष्ट्यादिदोषानुपसंगृह्णन्नाह—

दृष्टिविषदृष्टिरिव दृक् कृत्यावत् संकथाग्निवत्संगः।
स्त्रीणामिति सूत्रं स्मर नामापि ग्रहवदिति च वक्तव्यम् ॥८९॥ ३

दृष्टिविष.—सर्पविशेषः। कृत्यावत्—विद्याविशेषो यथा। सूत्रं—नानार्थसूत्रकत्वात्। वक्तव्यं—सूत्रातिरिक्त वचनम्, एकार्थपरत्वात् ॥८९॥ ६

अथ स्त्रीप्रसंगदोषानुपसंहरन्नाह—

किं बहुना चित्रादिस्थापितरूपापि कथमपि नरस्य।
हृदि शाकिनीव तन्वी तनोति संक्रम्य वैकृतशतानि ॥९०॥ ९

वैकृतशतानि। तानि च—

'खद्धो खद्धो पभणइ लुंचइ सीसं न याणए किं पि।
गयचेयणो हु विलवइ उड्ढं जोएइ अह ण जोएइ ॥' [ ] १२

इत्यादीनि मन्त्रमहोदधौ शाकिन्या[1] स्त्रियास्तु प्रागुक्तिरिति ॥९०॥

होनेपर ही मनुष्य स्त्रीके प्रति आकृष्ट होकर उसकी कोमल बाहुओंके बन्धनमें बँधता है। शरीरके इस तुच्छ बन्धनसे आत्माका मोहबन्धन बलवान् है। उससे छूटनेका प्रयत्न करना चाहिए ॥८८॥

आगे स्त्री दृष्टि आदिके दोषोंको बतलाते हैं—

हे साधु! इस सूत्रवाक्यको स्मरण रखो कि स्त्रीकी दृष्टि दृष्टिविष सर्पकी दृष्टिकी तरह है। उनके साथ बातचीत कृत्या नामक मारण विद्याकी तरह है। उनका संग अग्निकी तरह है। तथा इस वक्तव्यको भी याद रखो कि उनका नाम भी भूतकी तरह है ॥८९॥

विशेषार्थ—जिस वाक्यसे अनेक अर्थोंका सूचन होता है उसे सूत्र कहते हैं। ब्रह्मचारीके लिए भी कुछ सूत्र वचन सदा स्मरणीय हैं, उन्हें कभी भूलना नहीं चाहिए। जैसे दृष्टिविष—जिसकी आँखमें विष होता है उसे दृष्टिविष कहते हैं। उसकी दृष्टिसे ही मनुष्यका बल क्षीण हो जाता है। स्त्रीकी दृष्टि भी ऐसी ही घातक है। जैसे मारणविद्या मनुष्योंके प्राणोंको हर लेती है उसी तरह स्त्रीके साथ संभाषण साधुके संयमरूपी प्राणको हर लेता है। तथा जैसे अग्निका संसर्ग जलाकर भस्म कर देता है वैसे ही स्त्रीका संग साधुके संयमरूपी रत्नको जलाकर राख कर देता है। अतः स्त्रीकी दृष्टिसे, उसके साथ संभाषणसे उसके संसर्गसे दूर ही रहना चाहिए। इसके साथ ही इतना वक्तव्य और भी याद रखना चाहिए कि स्त्रीकी दृष्टि आदि ही नहीं, उनका नाम भी भूतकी तरह भयानक है ॥८९॥

आगे स्त्रीके संसर्गसे होनेवाले दोषोंका उपसंहार करते हैं—

अधिक कहनेसे क्या? चित्र, काष्ठफलक आदिमें अंकित स्त्री भी किसी भी प्रकारसे शाकिनीकी तरह मनुष्यके हृदयमे प्रवेश करके सैकड़ों विकारोंको उत्पन्न करती है ॥९०॥

---

१. न्या कथितानि। स्त्रियास्तु प्राक्प्रबन्धेन—भ कु च.।

अथैवं स्त्रीसंसर्गदोषान् व्याख्यायेदानीं पञ्चभिर्वृत्तैस्तदशुचित्वं प्रपञ्चयिष्यन् सामान्यतस्तावत्केशपाश-वक्त्राकृतीनामाहार्यरमणीयकसद्योविपर्याससंपादकत्वं मुमुक्षूणां निर्वेदनिदानत्वेन मुक्त्युद्योगानुगुणं स्यादित्या-
३ सूत्रयति—

गोगर्मुद्व्यजनैकवंशिकमुपस्कारोज्ज्वलं कैशिकं,
पादूकृद्‍गृहगन्धिमास्यमसकृत्ताम्बूलवासोत्कटम् ।
६ मूर्तिश्चाजिनकृद्दृतिप्रतिकृतिं संस्काररम्या क्षणाद्,
व्याजिष्यन्न नृणां यदि स्वममृते कस्तर्ह्युदस्थास्यत ॥९१॥

गवित्यादि—गवामनड्वाहीनां गर्मुतो मक्षिकास्तासां व्यजनं विक्षेपणं तालवृन्तम् । तस्यैकवंशिकं सगोत्रं
९ जुगुप्सास्पदत्वात् । स्वमात्मानं यदि न व्याजिष्यदिति गत्वा संबन्धः कर्तव्यः । एकः समानो वंशोऽन्वयो-ऽस्यास्तीति विगृह्य 'एकगोपूर्वाट्ठञ्नित्यम्' इति ठञ् । उपस्कारोज्ज्वलं—उपस्कारेण अभ्यङ्गस्नानधूपनादिप्रति-यत्नेन । उज्ज्वलं—दीप्तम् । कैशिकविशेषणमिदम् । कैशिकं—केशसमूहः । पादूकृद्‍गृहगन्धि—पादूकृत-
१२ श्चर्मकारस्य गृहस्येव गन्धोऽस्येति । पूर्ववत् 'स्वम्' इत्यस्य विशेषणम् । अजिनेत्यादि—अजिनकृतश्चर्मकारस्य दृतिं रज्यमानां खल्वां तत्प्रतिमम् । इदमपि स्वमित्यस्यैव विशेषणम् । व्याजिष्यत्—प्रकटमकरिष्यत् । स्वं—आत्मानम् । उदस्थास्यत—उद्यममकरिष्यत ॥९१॥

१५ अथ कामान्धस्य स्वोत्कर्षसंभावनं धिक्कुर्वन्नाह—

[१]कुचौ मांसग्रन्थी कनककलशावित्यभिसरन्-
सुधास्यन्दीत्यङ्गव्रणमुखमुखक्लेदकलुषम् ।

इस प्रकार स्त्रीसंगके दोषोंको कहकर अब पाँच पद्योंसे उनकी अशुचिताको कहना चाहते हैं। पहले सामान्यसे स्त्रियोंके केशपाश, मुख और शरीरको ऊपरी उपायोंसे सुन्दर किन्तु शीघ्र ही बदसूरत बतलाते हैं जिससे मुमुक्षु उनसे विरक्त होकर मुक्तिके उद्योगमें लगें—

स्त्रियों और पुरुषोंका केशसमूह गाय और बैलोंकी मक्खियाँ भगानेवाली पूँछके बालोंके ही वंशका है, दोनोंका एक ही कुल है। किन्तु तेल, साबुन-स्नान आदिसे उन्हें चमकाकर स्त्री पुरुषोंके सामने और पुरुष स्त्रियोंके सामने उपस्थित होते हैं। मुख चर्मकार-के घरकी तरह दुर्गन्धयुक्त है। किन्तु उसे बार-बार ताम्बूलकी सुवाससे वासित करके स्त्री और पुरुष परस्परमें एक दूसरेके सामने उपस्थित होते हैं। शरीर चर्मकारकी रँगी हुई मशकके समान है। किन्तु उसे भी स्नान, सुगन्ध आदिसे सुन्दर बनाकर स्त्री और पुरुष परस्परमें एक दूसरेके सामने उपस्थित होते हैं। किन्तु यह बनावट क्षण-भरमें ही विलीन हो जाती है और केशपाश, मुख और शरीर अपनी स्वाभाविक दशामें प्रकट हो जाते हैं। यदि ऐसा न होता तो मोक्षके विषय में कौन उद्यम करता अर्थात् मोक्षमार्गमें कोई भी न लगता ॥९१॥

कामान्ध पुरुषके अपनेको महान् समझनेकी भावनाका तिरस्कार करते हैं—

---

१. 'स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ ।
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ॥
स्रवन्मूत्रक्लिन्नं करिवरशिर स्पर्धि जघनं
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥'—वैराग्यश. १६ श्लो. ।

पिबन्नोष्ठं गच्छन्नपि रमणमित्यार्तवपथं,
भगं धिक् कामान्धः स्वमनु मनुते स्वःपतिमपि ॥९२॥

अभिसरन्—आलिङ्गन् । अङ्गेत्यादि—अङ्गं व्रणमिवाशुचिरूपत्वात् तस्य मुखं द्वारं यन्मुखं वक्त्र तस्य क्लेदेन क्वाथेन कलुषं कश्मलम् । गच्छन्—उपभुञ्जान । आर्तवपथं—रजोवाहियोनिरन्ध्रम् । स्वमनु—आत्मन सकाशाद्धीनम् ॥९२॥ ३

अथ स्त्रीशरीरेऽनुरज्यन्त्या दृष्टौ सद्यस्तत्स्वरूपपरिज्ञानोन्मेष एव मोहोच्छेदाय स्यादित्यावेदयति— ६

रेतःशोणितसंभवे बृहदणुस्रोतःप्रणालीगल-
द्गर्ह्योद्गारमलोपलक्षितनिजान्तर्भागभाग्योदये ।
तन्वङ्गीवपुषीन्द्रजालवदलं भ्रान्तौ सजन्त्यां दृशि, ९
द्रागुन्मीलति तत्त्वदृग् यदि गले मोहस्य दत्तं पदम् ॥९३॥

बृंहन्ति—नासागुदादिरन्ध्राणि, अणूनि—रोमकूपविवराणि । गर्ह्योद्गाराः—जुगुप्सोद्भावकाः । मलाः—श्लेष्मविण्मूत्रप्रस्वेदादय. । भाग्योदयः—विपरीतलक्षणया पुण्यविपाक । अलंभ्रान्तौ—भ्रान्तये विभ्रमायालं समर्थम् । 'तिकुप्रादय.' इति समासः ॥९३॥ १२

अथ स्त्रीशरीरस्याहारवस्त्रानुलेपनादिप्रयोगेणैव चारुत्वं स्यादिति प्रौढोक्त्या व्यञ्जयति—

वर्च.पाकचरुं जुगुप्स्यवसतिं प्रस्वेदधारागृहं, १५
बीभत्सैकविभावभावनिवहैर्निर्माय नारीवपुः ।
वेधा वेद्मि सरीसृजीति तदुपस्कारैकसारं जगत्
को वा क्लेशमवैति शर्मणि रतः संप्रत्ययप्रत्यये ॥९४॥ १८

कामसे अन्धा हुआ मनुष्य मांसकी ग्रन्थिरूप स्त्रीके स्तनोंको सोनेके कलश मानकर उनका आलिंगन करता है। जो मुख शरीरके घावके बहनेका द्वार जैसा है उसके कफ आदिसे दूषित हुए स्त्रीके ओष्ठको अमृतका प्रवाही मानकर पीता है, रजको बहानेवाले स्त्रीके योनि छिद्रमें रमण मानकर सम्भोग करता है। और ऐसा करते समय इन्द्रको भी अपनेसे हीन मानता है। उसकी यह कल्पना धिक्कारके योग्य है ॥९२॥

जिस समय दृष्टि स्त्रीके शरीरमें अनुरक्त हो, तत्काल ही उसके स्वरूपके परिज्ञानकी झलक ही मोहको दूर कर सकनेमें समर्थ है ऐसा कहते हैं—

स्त्रीका शरीर रज और वीर्यसे उत्पन्न होता है। उसमें नाक, गुदा आदि बड़े छिद्र हैं और रोमावलीके छोटे छिद्र हैं। ये वे नालियाँ हैं जिनसे ग्लानि उत्पन्न करनेवाले शब्दके साथ मल-मूत्रादि बहते रहते हैं। उनसे उनके शरीरके अन्तर्भागमें कितना पुण्यका उदय है यह अनुभवमें आ जाता है। फिर भी इन्द्रजाल (जादूगरी) की तरह वह शरीर मनुष्योंको भ्रममे डालनेमें समर्थ है अर्थात् ऐसे शरीरके होते हुए भी मनुष्य उसके मोहमें पड़ जाते हैं। अतः उसमे दृष्टि आसक्त होते ही यदि तत्काल तत्त्वदृष्टि खुल जाती है तो समझना चाहिए कि मोहकी गर्दनपर पैर रख दिया गया अर्थात् साधुने मोहका तिरस्कार कर दिया ॥९३॥

स्त्रीका शरीर सुस्वादु पौष्टिक आहार और वस्त्र आदिके व्यवहारसे ही सुन्दर प्रतीत होता है यह बात प्रौढ पुरुषोंकी उक्तिसे प्रकट करते हैं—

नारीका शरीर मलको पकानेके लिए एक पात्र है, घृणा पैदा करनेवाले मलमूत्र आदिका घर है, पसीनेका फुवारा है। मुझे ऐसा लगता है कि एक मात्र बीभत्स रसके आलम्बन-

चरु:—स्थाली । जुगुप्स्यानि—सूकाजनकानि मूत्रार्तवादीनि । वीभत्सः—जुगुप्साप्रभवो हृत्संकोच-कृद्रस । विभावा —कारणानि । भावा —पदार्था दोषधातुमलादय । सरीसृजीति—पुन. पुन सृजति ।
३ तदुपस्कारैकसार—तस्य नारीवपुष उपस्कारो गुणान्तराधान चारुत्वसौरस्याद्यापादन, स एवैक उत्कृष्टः सार फल यस्य तेनैकेन वा सारं ग्राह्यम् । जगत्—भोगोपभोगाङ्गप्रपञ्चम् । चराचरस्यापि जगतो रामाशरीर-रम्यतासपादनद्वारेणैव कामिनामन्त परमनिर्वृतिनिमित्तत्वात्तदुपभोगस्यैव लोके परमपुरुषार्थतया प्रसिद्धत्वात् ।
६ तदाह भद्ररुद्रट.—

'राज्ये सारं वसुधा वसुधराया पुर पुरे सौधम् ।
सौधे तल्प तल्पे वराङ्गनानङ्गसर्वस्वम् ॥'—[काव्यालकार ॥७।९७॥]

९ सप्रत्ययप्रत्यये—अतद्गुणे वस्तुनि तद्गुणत्वेनाभिनिवेश. सप्रत्ययस्तत्कारणके ॥९४॥

अथ परमावद्ययोषिदुपस्थलालसस्य पृथग्जनस्य विषयव्यामुग्धवुद्धेर्दुस्सहनरकदु.खोपभोगयोग्यताकरणो-द्योगमनुशोचति—

१२ विष्यन्दिक्लेदविश्राम्भसि युवतिवपु श्वभ्रभूभागभाजि,
क्लेशाग्निक्लान्तजन्तुव्रजयुजि रुधिरोद्गारगर्होद्धुरायाम् ।
आप्लुनो योनिनद्यां प्रकुपितकरणप्रेतवर्गोपसर्ग-
१५ मूर्छाल स्वस्य वालः कथमनुगुणयेद्दै तरं वैतरण्याम् ।।९५।।

उद्दीपन रूपसे जनक दोष धातु मल आदि पदार्थोंके समूहसे उस नारीके शरीरका निर्माण करके ब्रह्मा जगत्का निर्माण करता है क्योंकि नारीके शरीरको सुन्दरता प्रदान करना ही इस जगत्का एक मात्र सार है । अर्थात् नारीके शरीरको सुन्दरता प्रदान करनेके द्वारा ही यह चराचर जगत् कामी जनोंके मनमे परमनिवृत्ति उत्पन्न करता है, लोकमे नारीके शरीरके उपभोगको ही परम पुरुपार्थ माना जाता है अथवा जिसमे जो गुण नहीं है उसमे वह गुण मान लेनेसे होनेवाले सुखमे आसक्त कौन मनुष्य दुःखका अनुभव करता है ? कोई भी नहीं करता ॥९४॥

स्त्रीशरीरके निन्दनीय भागमे आसक्त और विषयोंमे ही संलग्न मूढ पुरुप नरकके दु:सह दु खोंको भोगनेकी योग्यता सम्पादन करनेमे जो उद्योग करता है उसपर खेद प्रकट करते हैं

योनि एक नदीके तुल्य है उससे तरल द्रव्यरूप दुर्गन्धित जल सदा झरता रहता है, युवतीके शरीररूपी नरकभूमिके नियत भागमे वह स्थित है, दु.खरूपी अग्निसे पीड़ित जन्तुओंका समूह उसमे बसता है और रुधिरके बहावसे वह अत्यन्त ग्लानिपूर्ण है। उस योनिरूपी नदीमे आसक्त और क्रुद्ध इन्द्रियरूपी नारकियोंके उपसर्गोंसे मूर्छित हुआ मूढ अपनेको कैसे वैतरणी नदीमे तिरनेके योग्य बना सकेगा ? ॥९५॥

विशेषार्थ—कामान्ध मनुष्य सदा स्त्रीकी योनिरूपी नदीमे डूबा रहता है। मरनेपर वह अवश्य ही नरक जायेगा। वहाँ भी वैतरणी नदी है। यहाँ उसे इन्द्रियाँ सताती हैं तो मूर्छित होकर योनिरूप नदीमें डुबकी लगाता है। नरकमे नारकी सतायेंगे तो वैतरणीमें डूबना होगा। मगर उसने तो नदीमें डूबना ही सीखा है तैरना नहीं सीखा। तब वह कैसे वैतरणी पार कर सकेगा ? उसे तो उसीमें डूबे रहना होगा ॥९५॥

विश्रं—आमगन्धि । आद्यूनः—लम्पटः । प्रेताः—नारकाः । मूर्च्छालः—मूर्छितः । अनुगुणयेत्—अनुकूलयेत् । तरं—प्रतरणम् । वैतरण्यां—नरकनद्याम् ॥९५॥

अथ पञ्चभिः पद्यैर्वृद्धसागत्यविधातुमना कुशलसातत्यकामस्य मुमुक्षोर्मोक्षमार्गनिर्वहणचणाना परिचरणमत्यन्तकरणीयतया प्रागुपक्षिपति— ३

स्वानूकाङ्कुशिताशयाः सुगुरुवाग्वृत्यस्तचेतःशयाः,
संसारार्तिबृहद्भयाः परहितव्यापारनित्योच्छ्रयाः । ६
प्रत्यासन्नमहोदयाः समरसीभावानुभावोदयाः,
सेव्याः शश्वदिह त्वयाद्रुतनया. श्रेयःप्रबन्धेप्सया ॥९६॥

अनूकः—कुलम् । तच्चेह पितृगुरुसंबन्धि । कुलीनो हि दुरपवादभयादकृत्यान्नितरां जुगुप्सते । चेतःशयः—कामः । यदाह— ९

'यः करोति गुरुभाषितं मुदा संश्रये वसति वृद्धसंकुले ।
मुञ्चते तरुणलोकसंगतिं ब्रह्मचर्यममलं स रक्षति ॥' [ ] १२

उच्छ्रयः—उत्सव. । महोदयः—मोक्ष. । समरसीभावः—शुद्धचिदानन्दानुभव । तदनुभावा.—सद्योरागादिप्रक्षयजातिकारणवैरोपशमनोपसर्गनिवारणादयस्तेषामुदय उत्कर्षो येषाम् । । अथवा समरसीभावस्यानुभाव. कार्यमुदयो बुद्धितपोविक्रियौषधिप्रभृतिलब्धिलक्षणोऽभ्युदयो येषाम् ॥९६॥ १५

अथ वृद्धेतरसागत्ययो. फलविशेषमभिलषति—

कालुष्यं पुंस्युदीर्णं जल इव कतकैः संगमाद्व्येति वृद्धै-
रश्मक्षेपादिवाम्प्रशममपि लघूदेति तत्षिङ्गसङ्गात् । १८
वार्भिर्गन्धो मृदीवोद्भवति च युवभिस्तत्र लीनोऽपि योगाद्,
रागो द्राग्वृद्धसङ्गात्सरटवदुपलक्षेपतश्चैति शान्तिम् ॥९७॥

आगे पाँच श्लोकोंसे वृद्ध पुरुषोंकी संगतिका विधान करना चाहते हैं। सर्वप्रथम निरन्तर कुशलताके इच्छुक मुमुक्षुको मोक्षमार्गका निर्वहण करनेमें कुशल गुरुओंकी सेवा अवश्य करनेका निर्देश करते हैं—

हे साधु ! इस ब्रह्मचर्यव्रतमें चारित्र अथवा कल्याणमें रुकावट न आनेकी इच्छासे तुझे ऐसे नीतिशाली वृद्धाचार्योंकी सेवा करनी चाहिए जिनका पितृकुल और गुरुकुल उनके चित्तको कुमार्गमें जानेसे रोकता है (क्योंकि कुलीन पुरुष खोटे अपवादके भयसे खोटे कार्योंसे अत्यन्त ग्लानि करता है), सच्चे गुरुओंके वचनोंके अनुसार चलनेसे जिनका कामविकार नष्ट हो गया है, जो संसारके दुःखोंसे अत्यन्त भीत रहते हैं, सदा परहितके व्यापारमें आनन्द मानते हैं, जिनका मोक्ष निकट है, तथा शुद्ध चिदानन्दके अनुभवके प्रभावसे जिनके तत्काल रागादिका प्रक्षय, जन्मसे होनेवाले वैरका उपशमन, उपसर्गनिवारण आदिका उत्कर्ष पाया जाता है अथवा शुद्ध चिदानन्दके अनुभवका कार्य बुद्धि, विक्रिया, तप, औषधि आदि ऋद्धिरूप अभ्युदय पाया जाता है, ऐसे आचार्योंकी संगति अवश्य करनी चाहिए ॥९६॥

वृद्धजनोंकी और युवाजनोंकी संगतिके फलमें अन्तर बतलाते हैं—

जैसे जलमें कीचड़के योगसे उत्पन्न हुई कालिमा निर्मलीके चूर्णके योगसे शान्त हो जाती है वैसे ही अपने निमित्तोंके सम्बन्धसे जीवमें उत्पन्न हुई कालिमा अर्थात् द्वेष, शोक,

कालुष्य—द्वेषशोकभयादिसंक्लेश. पङ्काविलत्वं च । सरटवत्—करकेटुको यथा । दृग्ति शान्ति—शाम्यति । राग उदीर्णोऽपि इत्युपसृत्य योज्यम् ॥९७॥

३ अथ प्रायो यौवनस्यावश्य विकारकारित्वप्रसिद्धेर्गुणातिशयशालिनोऽपि तरुणस्याश्रयणमविश्वास्यतया प्रकाशयन्नाह—

अभ्युद्यद्गुणरत्नराशिरुगपि स्वच्छः कुलीनोऽपि ना,
६ नव्येनाम्बुधिरिन्दुनेव वयसा संक्षोभ्यमाणः शनैः ।
आशाचक्रविवर्तिगर्जितजलाभोगः प्रवृत्त्यापगाः,
पुण्यात्माः प्रतिलोमयन् विधुरयत्यात्माश्रयान् प्रायशः ॥९८॥

९ रुक्—दीप्ति. । सक्षोभ्यमाण'—प्रकृतेश्चाल्यमान. । यल्लोक —

'अवश्यं यौवनस्थेन क्लीवेनापि हि जन्तुना ।
विकार खलु कर्तव्यो नाविकाराय यौवनम् ॥' [ ]

१२ जलाभोग.—मूढलोकोपभोगो वारिविस्तारश्च । पुण्यात्मा:—पवित्रस्वभावा' । अनश्चवादिति डात् । प्रतिलोमयन्—[1]प्रावर्तयन् प्रावारिणी. कुर्वन्नित्यर्थ । विधुरयति—श्रेयसो भ्रंशयति आत्माश्रयान् शिप्यादीन्मत्स्यादीश्च ॥९८॥

भय आदि रूप संक्लेश ज्ञान और संयमसे वृद्ध पुरुषोंकी संगतिसे शान्त हो जाता है। तथा जैसे जलमें निर्मलीके चूर्णसे शान्त हुई कीचडकी कालिमा पत्थर फेंकनेसे तत्काल उद्भूत हो जाती है वैसे ही जीवमें वृद्धजनोंकी संगतिसे शान्त हुआ भी संक्लेश दुराचारी पुरुषोंकी संगतिसे पुनः उत्पन्न हो जाता है। जैसे मिट्टीमें छिपी हुई गन्ध जलका योग पाकर प्रकट होती है उसी तरह युवाजनोंकी संगतिसे जीवका अप्रकट भी राग प्रकट हो जाता है। तथा जैसे पत्थरके फेकनेसे गिरगिटका राग—बदलता हुआ रंग शान्त हो जाता है वैसे ही वृद्धोंकी संगतिसे उद्भूत हुआ राग शान्त हो जाता है। अतः ब्रह्मचर्य व्रतके पालकोंको दुराचारी जनोंकी संगति छोड़कर ज्ञानवृद्ध और संयमवृद्धोंकी संगति करनी चाहिए ॥९७॥

यह बात प्रसिद्ध है कि प्रायः यौवन अवस्थामें विकार अवश्य होता है। अत. अतिशय गुणशाली तरुणकी संगति भी सर्वथा विश्वसनीय नहीं है, यह बात कहते हैं—

जैसे रत्नोंकी राशिकी चमकसे प्रदीप्त स्वच्छ और प्रशान्त भी समुद्र चन्द्रमाके द्वारा धीरे-धीरे क्षुब्ध होकर अपने गर्जनयुक्त जलके विस्तारसे दिशा मण्डलको चंचल कर देता है, पवित्र गगा आदि नदियोंको उन्मार्गगामिनी बना देता है और समुद्रमें बसनेवाले मगर-मच्छोंको भी प्रायः कष्ट देता है उसी प्रकार प्रतिक्षण बढते हुए गुणोंके समूहसे प्रदीप्त स्वच्छ कुलीन भी मनुष्य यौवन अवस्थामें धीरे-धीरे चंचल होता हुआ आशापाशमें फँसे हुए और डींग मारनेवाले मूढ लोगोंके इष्ट विषयोपभोगका साधन बनकर अर्थात् कुसंगमें पडकर अपनी मन-वचन-कायकी पुण्य-प्रवृत्तियोंको कुमार्गमें ले जाता है और अपने आश्रितोंको भी कल्याणसे भ्रष्ट कर देता है ॥९८॥

---

१. व्यावर्तयन् उत्पथे चारिणी कुर्वन्नित्यर्थ —भ कु च ।

अथ तारुण्येऽप्यविकारिणं प्रशंसयति—

दुर्गेऽपि यौवनवने विहरन् विवेकचिन्तामणिं स्फुटमहत्त्वमवाप्य धन्यः।
चिन्तानुरूपगुणसंपदुरुप्रभावो वृद्धो भवत्यपलितोऽपि जगद्विनीत्या ॥९९॥

जगद्विनीत्या—लोकानां शिक्षासंपादनेन ॥९९॥

अथासाधुसाधुकथाफलं लक्ष्यद्वारेण स्फुटयति—

सुशीलोऽपि कुशीलः स्याद्दुर्गोष्ठ्या चारुदत्तवत्।
कुशीलोऽपि सुशीलः स्यात् सद्गोष्ठ्या मारिदत्तवत् ॥१००॥

स्पष्टम् ॥१००॥

जो युवावस्थामें भी निर्विकार रहते हैं उनकी प्रशंसा करते है—

यौवनरूपी दुर्गम वनमें विहार करते हुए अर्थात् युवावस्थामें महिमाको प्रकट करने-वाले विवेकरूपी चिन्तामणिको प्राप्त करके चिन्ताके अनुरूप गुणसम्पदासे महान् प्रभाव-शाली धन्य पुरुष लोगोंको शिक्षा प्रदान करनेके कारण केशोंके श्वेत न होनेपर भी वृद्ध जैसा होता है अर्थात् जो युवावस्थामें संयम धारण करके लोगोंको सत् शिक्षा देता है वह वृद्धा-वस्थाके बिना भी वृद्ध है ॥९९॥

असाधु और साधु पुरुषोंके साथ संभाषणादि करनेका फल दृष्टान्त द्वारा बत-लाते हैं—

दुष्टजनोंकी संगतिसे चारुदत्त सेठकी तरह सुशील भी दुराचारी हो जाता है। और सज्जनोंकी संगतिसे मारिदत्त राजाकी तरह दुराचारी भी सदाचारी हो जाता है ॥१००॥

विशेषार्थ—जैन कथानकोंमें चारुदत्त और यशोधरकी कथाएँ अतिप्रसिद्ध हैं। चारुदत्त प्रारम्भमें बड़ा धर्मात्मा था। अपनी पत्नीके पास भी न जाता था। फलत. उसे विषयासक्त बनानेके लिए वेश्याकी संगतिमें रखा गया तो वह इतना विषयासक्त हो गया कि बारह वर्षोंमें सोलह करोड़ स्वर्णमुद्राएँ लुटा बैठा। जब पासमें कुछ भी न रहा तो वेश्याकी अभि-भाविकाने एक दिन रात्रिमें उसे सोता हुआ ही उठवाकर नगरके चौराहे पर फिकवा दिया। इस तरह कुसंगमें पड़कर धर्मात्मा चारुदत्त कदाचारी बन गया। इसी तरह मारिदत्त राजा अपनी कुलदेवी चण्डमारीको बलि दिया करता था। एक बार उसने सब प्रकारके जीव-जन्तुओंके युगलकी बलि देवीको देनेका विचार किया। उसके सेवक एक मनुष्य युगलकी खोजमें थे। एक तरुण सुरूप क्षुल्लक और क्षुल्लिका भोजनके लिए नगरमें आये। राजाके आदमी उन दोनोंको पकड़कर ले गये। राजाने उन्हें देखकर पूछा—तुम दोनों कौन हो और इस कुमारवयमें दीक्षा लेनेका कारण क्या है? तब उन्होंने अपने पूर्वजन्मोंका वृत्तान्त सुनाया कि किस तरह एक आटेके बने मुर्गेका बलिदान करनेसे उन्हें कितना कष्ट भोगना पड़ा। उसे सुनकर राजा मारिदत्तने जीवबलिका विचार छोड़ दिया और जिनदीक्षा धारण कर ली। यह सत्संगतिका फल है ॥१००॥

अथैवं स्त्रीवैराग्यपञ्चकोपचितं ब्रह्मचर्यव्रतं स्त्रीरागकथाश्रवणतन्मनोहराङ्गनिरीक्षणपूर्वरतानुस्मरण-वृष्येष्टरस-स्वशरीरसंस्कारपरिहारस्वभावभावनापञ्चकेन स्थैर्यमापादयेदित्युपदेष्टुमिदमाचष्टे—

३ **रामारागकथाश्रुतौ श्रुतिपरिभ्रष्टोऽसि चेद् भ्रष्टदृक्,**
तद्रम्याङ्गनिरीक्षणे भवसि चेत्तत्पूर्वभुक्तावसि।
निःसंज्ञो यदि वृष्यवाञ्छितरसास्वादेऽरसज्ञोऽसि चेत्,
६ **संस्कारे स्वतनोः कुजोऽसि यदि तत् सिद्धोऽसि तुर्यव्रते ॥१०१॥**

रामारागकथाश्रुतौ—रामाया स्त्रिया रागो रतिः, तदर्थं[1] रामयो वा रागेण क्रियमाणा कथा तदाकर्णने। श्रुतिपरिभ्रष्टः—अत्यन्तबधिर संस्कारपराङ्मुखोऽसीत्यर्थः ॥१०१॥

९ अथ वृष्यद्रव्यसौहित्यप्रभावं भावयति—

को न वाजीकृतां दृप्तः कन्तुं कन्दलयेद्यतः।
ऊर्ध्वमूलमधःशाखमृषयः पुरुषं विदुः ॥१०२॥

१२ वाजीकृतां—अवाजिनं वाजिनं कुर्वन्ति वाजीकृतो रतौ वृद्धिकराः क्षीराद्यर्थास्तेषाम्। कन्दलयेत्—उद्भावयेत्। जीह्वेन्द्रियसंतर्पणाप्रभवत्वात् कन्दर्पदर्पस्य। अत्र पूर्वरतानुस्मरण—वृष्येष्टरसादिवर्जनस्य पुनरुपदेशो ब्रह्मचर्यपालने अत्यन्तयत्नः कर्तव्य इति बोधयति। मुहु साध्यत्वात्तस्य। तथा च ब्रुवन्ति—

आगे कहते हैं कि स्त्रीरागकथाश्रवण, उसके मनोहर अंगोंका निरीक्षण, पूर्व भुक्त भोगोंका स्मरण, कामोद्दीपक भोजन और शरीर सस्कार इन पाँचोंके त्यागरूप पाँच भावनाओंसे ब्रह्मचर्य व्रतको स्थिर करना चाहिए—

हे साधु ! यदि तू स्त्रीमें राग उत्पन्न करनेवाली अथवा स्त्रीसे रागसे की जानेवाली कथाको सुननेमें बहरा है, यदि तू उसके मुख, स्तन आदि मनोहर अंगोंको देखनेमें अन्धा है, यदि तू पहले भोगी हुई स्त्रीका स्मरण करनेमें असैनी है, यदि तू वीर्यवर्धक इच्छित रसोंके आस्वादमें जिह्वाहीन है, यदि तू अपने शरीरके संस्कार करनेमें वृक्ष है (वृक्ष अपना संस्कार नहीं करते) तो तू ब्रह्मचर्य व्रतमें सिद्ध है—सच्चा ब्रह्मचारी है ॥१०१॥

विशेषार्थ—आँख, कान और जिह्वा तथा मनपर नियन्त्रण किये विना ब्रह्मचर्यका पालन नहीं हो सकता। इसलिए ब्रह्मचारीको स्त्रियोंके विषयमें अन्धा, बहरा, गूँगा तथा असज्ञी तक बनना चाहिए। इसीलिए जैन मुनि स्नान, विलेपन, तेलमर्दन, दन्तमंजन आदि शरीर संस्कार नहीं करते। रसना इन्द्रियको भी स्पर्शन इन्द्रियकी तरह कामेन्द्रिय कहा है। इसका जीतना स्पर्शनसे भी कठिन है। अकलंक देवने तत्त्वार्थवार्तिकमे कहा है कि जो स्पर्शजन्य सुखका त्याग कर देते हैं वे भी रसनाको वशमें नहीं रख सकते। आगममें भी कहा है—'इन्द्रियोंमे रसना, कर्मोंमें मोहनीय, व्रतोंमे ब्रह्मचर्य और गुप्तियोंमें मनोगुप्ति ये चार बड़े कष्टसे वशमे आते हैं ॥१०१॥

वीर्यवर्द्धक रसोंके सेवनका प्रभाव बतलाते हैं—

मनुष्योंको घोड़ेके समान बना देनेवाले वीर्यवर्द्धक दूध आदि पदार्थोंको वाजीकरण कहते हैं। वाजीकरणके सेवनसे मत्त हुआ कौन पुरुष कामविकारको नहीं करता अर्थात् सभी करते हैं। क्योंकि ऋषियोंने पुरुषको ऊर्ध्वमूल और अधःशाख कहा है ॥१०२॥

---

१. तदर्थां रामया रागेण वा—भ. कु. च.।

'अक्खाण रसणी कम्माण मोहणी तह वयाण बंभं च।
गुत्तीणं मणगुत्ती चउरो दुक्खेण सिज्झंति ॥' [ ] ॥१०२॥

अथ पूर्वेऽपि भूयांसो मुक्तिपथप्रस्थायिनो ब्रह्मव्रतप्रमादभाजो लोके भूयासमुपहासमुपगता इति दर्शयंस्तत्र सुतरां साधूनवधानपरान् विधातुमाह—

दुर्धर्षोद्धतमोहशौल्किकतिरस्कारेण सद्माकराद्,
भूत्वा सद्‌गुणपण्यजातमयनं मुक्तेः पुरः प्रस्थिताः।
लोलाक्षीप्रतिसारकैर्मदवशैराक्षिप्य तां ता हठा-
न्नीताः किन्न विडम्बनां यतिवराः चारित्रपूर्वाः क्षितौ ॥१०३॥

शौल्किकः—शुवति शुलति वा सुखेन यात्यनेनेति शुल्कः प्रावेश्यनैष्क्रम्यद्रव्येभ्यो राजग्राह्यो भागः। शुल्के नियुक्तः शौल्किकः। तेन साधर्म्यं मोहस्य पापावद्यभूयिष्ठत्वात्। तस्य तिरस्कारः छलनोपक्रमः। आक्षिप्य—सोल्लुण्ठ हठाद् व्यावर्त्य। चारित्रपूर्वाः—पूर्वशब्देन शकट-कूर्चकर-रुद्रादयो गृह्यन्ते ॥१०३॥

विशेषार्थ—भगवद्‌गीता (अ. १५।१) में कहा है—'ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्' इसके द्वारा संसारको वृक्षका रूपक दिया है। उसीको लेकर यहाँ ग्रन्थकारने पुरुषके ऊपर घटित किया है। पुरुष मूल ऊपर है अर्थात् जिह्वा आदि उनका मूल है और हाथ-पैर आदि अवयव अधोगत शाखा हैं। इसका आशय यह है कि जिह्वाके द्वारा पुरुष जिस प्रकारका भोजन करता है उसी प्रकारके उसके शरीरके अवयव बनते हैं। अतः जिह्वा द्वारा वाजीकरण पदार्थोंका सेवन करनेसे शरीरके अवयव भी तदनुरूप होंगे। अतः उन्हें संयत करनेके लिए जिह्वा इन्द्रियको संयत करना चाहिए। उसके बिना ब्रह्मचर्यका पालन कठिन है ॥१०२॥

पूर्वकालमें बहुत-से मोक्षमार्गी पुरुष ब्रह्मचर्य व्रतमें प्रमाद करके लोकमें अत्यधिक उपहासके पात्र बने, यह दिखलाते हुए साधुओंको उसमें सावधान करते हैं—

पूर्वकालमें चारित्र, शकट, कूर्चवार रुद्र आदि अनेक प्रमुख यति, दुर्धर्ष और उद्धत चारित्र मोहनीय कर्मरूपी कर वसूल करनेवालेको छलकर घररूपी खानसे सम्यग्दर्शन आदि गुणरूप बहुत-सी विक्रेय वस्तुओंको लेकर मुक्तिके मार्गकी ओर चले थे। किन्तु कर वसूल करनेवाले चारित्र मोहनीय कर्मके स्त्रीरूपी गर्विष्ठ भटोंके द्वारा बलपूर्वक पकड लिये गये। फिर उनकी जगत्‌में शास्त्र और लोकमें प्रसिद्ध क्या-क्या विडम्बना नहीं हुई, उन्हें बहुत ही दुर्दशा भोगनी पड़ी ॥१०३॥

विशेषार्थ—राज्योंमें किसी खान वगैरहसे निकलनेवाली विक्रेय वस्तुओंपर कर वसूल करनेके लिए मनुष्य नियुक्त होते हैं। यदि कोई मनुष्य उन्हें छलकर और खानसे रत्न आदि लेकर मार्गमें जानेका प्रयत्न करता है तो कर वसूल करनेवालोंके उन्मत्त सिपाहियोंके द्वारा पकड़े जानेपर बलपूर्वक पीछे ढकेल दिया जाता है और फिर उसकी दुर्दशाका पार नहीं रहता। वही स्थिति पूर्वकालमें कुछ यतियोंकी हुई। वे भी मोक्षमार्गमें चले थे किन्तु उनके अन्तस्तलमें बैठा हुआ चारित्र मोहनीय कर्म बड़ा उद्धत था, उसे धोखा देना शक्य नहीं था। किन्तु उन यतियोंने उसकी परवाह नहीं की और घर त्याग कर बन गये संन्यासी और चल पड़े मुक्तिकी ओर। उन्हें शायद पता नहीं था कि चारित्रमोहनीय महाराजके बड़े गर्वीले भट नारीका सुन्दर रूप धारण करके ऐसे लोगोंको पकड़नेके लिए सावधान है। बस पकड़ लिये गये, कामिनीके मोहपाशमें फँस गये। फिर तो उनकी जगत्‌में खूब हँसी

अथाकिञ्चन्यव्रतमष्टचत्वारिंशता पद्यैर्व्यावर्णयितुमनास्तत्र शिवार्थिनः प्रोत्साहयितुं लोकोत्तरं तन्माहात्म्यमादावादिशति—

३　**मूर्छा मोहवशान्ममेदमहमस्येत्येवमावेशनं,**
　　तां दुष्टग्रहवन्न मे किमपि नो कस्याप्यहं खल्विति ।
　आकिञ्चन्य-सुसिद्धमन्त्रसतताभ्यासेन धुन्वन्ति ये
६　　**ते शश्वत्प्रतपन्ति विश्वपतयश्चित्रं हि वृत्तं सताम् ॥१०४॥**

मोहवशात्—चारित्रमोहवशात् चारित्रमोहनीयकर्मविपाकपारतन्त्र्यात् । उक्तं च—

'या मूर्छानामेय विज्ञातव्यः परिग्रहोऽयमिति ।
९　मोहोदयादुदीर्णो मूर्छा तु ममत्वपरिणामः ॥' [पुरुषार्थ १११]

तो हुई ही दुर्दशा भी कम नहीं हुई। महाभारत आदिमें उनकी कथा वर्णित है। अतः मुक्तिमार्गके पथिकोंको चारित्र मोहनीय महाराजसे बहुत सावधान रहना चाहिए। उनका देना-पावना चुकता करके मोक्षके मार्गमें पग रखना चाहिए अन्यथा उनके सिपाही आपको पकड़े बिना नहीं रहेंगे ॥१०३॥

इस प्रकार ब्रह्मचर्य व्रतका वर्णन समाप्त हुआ।

आगे अड़तालीस पद्योंसे आकिंचन्यव्रतको कहना चाहते हैं। सर्वप्रथम मुमुक्षुको प्रोत्साहित करनेके लिए उस व्रतका अलौकिक माहात्म्य बतलाते हैं—

मोहनीय कर्मके उदयसे 'यह मेरा है' 'मैं इसका हूँ' इस प्रकारका जो अभिप्राय होता है उसे मूर्छा कहते हैं। श्लोकमें आया 'एवं' शब्द प्रकारवाची है। अतः 'मैं याज्ञिक हूँ', 'मैं संन्यासी हूँ', 'मैं राजा हूँ' 'मैं पुरुष हूँ', 'मैं स्त्री हूँ', इत्यादि मिथ्यात्वमूलक अभिप्रायोंका ग्रहण होता है। इस प्रकारके सभी अभिप्राय मूर्छा हैं। कोई भी बाह्य या आभ्यन्तर काम-क्रोधादि वस्तु मेरी नहीं है और न मैं भी किसी बाह्य या आभ्यन्तर वस्तुका हूँ। 'खलु' शब्दसे कोई अन्य मैं नहीं हूँ और न मैं कोई अन्य हूँ इस प्रकारके आकिंचन्यव्रतरूप सुसिद्ध मन्त्रके निरन्तर अभ्याससे जो ब्रह्मराक्षस आदि दुष्ट ग्रहके समान उस मूर्छाका निग्रह करते हैं वे तीनों लोकोंके स्वामी होकर सदा प्रतापशाली रहते हैं। यहाँ यह शंका हो सकती है कि अकिंचन जगत्का स्वामी कैसे हो सकता है। अतः कहते हैं कि सन्त पुरुषोंका चरित अलौकिक होता है ॥१०४॥

विशेषार्थ—मेरा कुछ भी नहीं है इस प्रकारके भावको आकिंचन्य कहते हैं, उसका अर्थ होता है निर्ममत्व। अतः ममत्वका या मूर्छाका त्याग आकिंचन्यव्रत है। इसका दूसरा नाम परिग्रहत्यागव्रत है। वास्तवमें मूर्छाका नाम ही परिग्रह है। कहा है—'जो यह मूर्छा है उसे ही परिग्रह जानना चाहिए। मोहनीय कर्मके उदयसे होनेवाले ममत्व परिणामको मूर्छा कहते हैं।' ग्रन्थकार आशाधरने अपनी संस्कृत टीकामें मोहसे चारित्रमोहनीय लिया है क्योंकि चारित्रमोहनीयके भेद लोभके उदयमें ही परिग्रह संज्ञा होती है। कहा है—'उपकरणके देखनेसे, उसके चिन्तनसे, मूर्छाभाव होनेसे और लोभकर्मकी उदीरणा होनेपर परिग्रह संज्ञा होती है।' तत्त्वार्थ सूत्र ७।१७ में मूर्छाको परिग्रह कहा है। पूज्यपाद स्वामीने

१. उवयरणदंसणेण तस्सुवजोगेण मूच्छिदाए य ।
लोहस्सुदीरणाए परिग्गहे जायदे सण्णा ॥—गो. जी. १३८ गा. ।

इत्येवं—इतिशब्दः स्वरूपार्थः, एवंशब्द प्रकारार्थः। तेनाह याज्ञिकोऽहं, परिव्राडहं राजाहं पुमानहं स्त्रीत्यादि—मिथ्यात्वादिविवर्ताभिनिवेशा गृह्यन्ते। खलु—अतोऽपि न कोऽप्यन्योऽहमिति ग्राह्यम्। आकिञ्चन्यं—नैर्मल्यम्। सुसिद्धमन्त्रः—यो गुरूपदेशानन्तरमेव स्वकर्म कुर्यात्। यदाहुः— ३

'सिद्धः सिध्यति कालेन साध्यो होमजपादिना।
सुसिद्धस्तत्क्षणादेव अरिं मूलान्निकृन्तति॥' [ ]

धुन्वन्ति—निगृह्णन्ति। चित्रं—अकिञ्चनाश्च जगत्स्वामिनश्चेत्याश्चर्यम् ॥१०४॥ ६

अथोभयपरिग्रहदोषख्यापनपुरस्सरं श्रेयोर्थिनस्तत्परिहारमुपदिशति—

शोध्योऽन्तर्नं तुषेण तण्डुल इव ग्रन्थेन बद्धो बहि-
र्जीवस्तेन बहिर्भुवाऽपि रहितो मूर्छामुपार्छन् विषम्। ९
निर्मोकेण फणीव नार्हति गुणं दोषैरपि त्वेधते,
तद्ग्रन्थानबहिश्चतुर्दश बहिश्चोज्झेद्दश श्रेयसे ॥१०५॥

उसकी व्याख्यामें बाह्य गाय, भैंस, मणि, मुक्ता आदि चेतन-अचेतन वस्तुओंके और राग आदि उपाधियोंके संरक्षण, अर्जनके संस्कार रूप व्यापारको मूर्छा कहा है। इसपर-से यह शंका की गयी कि यदि मूर्छाका नाम परिग्रह है तब तो बाह्य वस्तु परिग्रह नहीं कही जायेगी क्योंकि मूर्छासे तो आभ्यन्तरका ही ग्रहण होता है। इसके उत्तरमें कहा है—उक्त कथन सत्य ही है क्योंकि प्रधान होनेसे अभ्यन्तर को ही परिग्रह कहा है। बाह्यमें कुछ भी पास न होनेपर भी 'मेरा यह है' इस प्रकार संकल्प करनेवाला परिग्रही होता है। इसपर पुनः शंका हुई कि तब तो बाह्य परिग्रह नहीं ही हुई। तो उत्तर दिया गया कि ऐसी बात नहीं है। बाह्य भी परिग्रह है क्योंकि मूर्छाका कारण है। पुनः शंका की गयी—यदि 'यह मेरा है' इस प्रकारका संकल्प परिग्रह है तो सम्यग्ज्ञान आदि भी परिग्रह कहलायेंगे क्योंकि जैसे राग आदि परिणाममें ममत्व भाव परिग्रह कहा जाता है वैसे ही सम्यग्ज्ञानादिकमें भी ममत्व भाव होता है। तब उत्तर दिया गया कि जहाँ प्रमत्तभावका योग है वहीं मूर्छा है। अतः सम्यग्ज्ञान, सम्यग्दर्शन और सम्यक् चारित्रसे युक्त व्यक्ति अप्रमत्त होता है। उसके मोहका अभाव होनेसे मूर्छा नहीं है अतः वह अपरिग्रही है। दूसरी बात यह है कि ज्ञान आदि तो आत्माका स्वभाव है। उसे छोड़ा नहीं जा सकता अतः वह परिग्रहमें सम्मिलित नहीं है। किन्तु राग आदि तो कर्मके उदयसे होते हैं, वे आत्माके स्वभाव नहीं हैं अतः छोड़ने योग्य हैं। उनमें 'यह मेरे हैं' ऐसा संकल्प करना परिग्रह है। यह संकल्प सब दोषोंका मूल है। 'यह मेरा है' ऐसा संकल्प होनेपर उसकी रक्षाका भाव होता है। उसमें हिंसा अवश्य होती है। परिग्रहकी रक्षाके लिए उसके उपार्जनके लिए झूठ बोलता है, चोरी भी करता है अतः परिग्रह सब अनर्थोंकी जड़ है। उससे छुटकारा पानेका रास्ता है आकिंचन्यरूप सुसिद्ध मन्त्रका निरन्तर अभ्यास। जो मन्त्र गुरुके उपदेशके अनन्तर तत्काल अपना काम करता है उस मन्त्रको सुसिद्ध कहते हैं। कहा है— जो काल पाकर सिद्ध होता है वह सिद्ध मन्त्र है। जो होम-जप आदिसे साधा जाता है वह साध्य मन्त्र है। और जो तत्क्षण ही शत्रुको मूलसे नष्ट कर देता है वह सुसिद्ध मन्त्र है।'

आकिंचन्य भाव परिग्रहका पाश छेदनेके लिए ऐसा ही सुसिद्ध मन्त्र है ॥१०४॥

दोनों ही प्रकारके परिग्रहोंके दोष बताते हुए मुमुक्षुओंको उनके त्यागका उपदेश देते हैं—

शोध्य.—कर्ममल कौण्डक च त्याजयितुमशक्य. । रुद्ध:—आसक्ति नीतः छादितश्च ।

'शक्यो यथापनेतु न कोण्डकस्तन्दुलस्य सतुषस्य ।
३ न तथा शक्यं जन्तो. कर्ममलं सङ्गसक्तस्य ॥' [ ]

गुण—अहिंसकत्वाभिगम्यत्वादिकम् । अबहि —आभ्यन्तरान् । तद्यथा—

'मिच्छत्तवेदरागा हस्सादीया य तह य छद्दोसा ।
६ चत्तारि तह कसाया चउदसब्भंतरा गथा ॥ [भ आरा. १११८ गा.]

दश क्षेत्रादीन् । यदाह—

'क्षेत्र धान्यं धनं वास्तु कुप्य शयनमासनम् ।
९ द्विपदा. पशवो भाण्ड बाह्या दश परिग्रहा.॥' [सोम. उपा. ४३३ श्लो.]

जैसे बाहरमे तुषसे वेष्टित चावल अर्थात् धान बाहरका छिलका दूर हुए बिना अन्दरसे शुद्ध नहीं हो सकता, वैसे ही बाह्य परिग्रहमे आसक्त हुआ जीव अभ्यन्तर कर्ममल-को छोडनेमे असमर्थ होनेसे अन्त शुद्ध नहीं हो सकता। इसपर-से यह शंका हो सकती है कि यदि ऐसी बात है तो बाह्य परिग्रह ही छोडना चाहिए, अन्तरंग परिग्रह नहीं छोडना चाहिए ? इसके उत्तरमे कहते हैं—जैसे केचुलीसे रहित भी सर्प विषधर होनेसे गुणी नहीं हो जाता किन्तु विष रहनेसे दोषी ही होता है, वैसे ही बाह्य परिग्रहसे रहित भी जीव यदि अन्दरमे ममत्व भाव रखता है तो अहिंसा आदि गुणोंका पात्र नहीं होता, किन्तु दोषोंका ही पात्र होता है। इसलिए चारित्रकी रक्षाके लिए और मोक्षकी प्राप्तिके लिए अन्तरंग चौदह और बाह्य दस परिग्रहोंको छोड़ना चाहिए ॥१०५॥

विशेषार्थ—बाह्य परिग्रहोंको त्यागे विना अन्त शुद्धि उसी प्रकार सम्भव नहीं है जैसे धानके ऊपरका छिलका दूर हुए बिना धानके अन्दर चावलके ऊपरका लाल आवरण दूर होकर चावल स्वच्छ सफेद नहीं हो सकता। कहा है—'जैसे तुष (छिलका) सहित चावलके ऊपरका लाल छिलका दूर नहीं किया जा सकता वैसे ही परिग्रहमे आसक्त जीवका कर्ममल दूर नहीं किया जा सकता।'

किन्तु इसका यह मतलब नहीं है कि केवल बाह्य परिग्रह ही छोड़ने योग्य हैं या बाह्य परिग्रहके छोड़नेसे अन्तरंग परिग्रहसे छुटकारा मिल जाता है। बाह्य परिग्रहकी तरह अन्तरंग परिग्रह भी छोड़ना चाहिए तथा उसके लिए सदा प्रयत्नशील रहना चाहिए। बाह्य परिग्रह छोड़ देनेपर भी यदि शरीरके प्रति भी ममत्व भाव बना रहा तो शरीरके नग्न रहनेपर भी परिग्रहसे छुटकारा नहीं हो सकता। अभ्यन्तर परिग्रह इस प्रकार हैं—मिथ्यात्व —वस्तुके यथार्थ स्वरूपका अश्रद्धान, स्त्रीवेद, पुरुषवेद, नपुंसकवेद अर्थात् स्त्रीवेद नोकषायके उदयसे पुरुषमे, पुरुषवेद नोकषायके उदयसे स्त्रीमें और नपुंसकवेद नोकषायके उदयसे दोनोंमे रमणकी अभिलाषा, हास्य, भय, जुगुप्सा, रति, अरति, शोक तथा चार कषाय ये चौदह अन्तरंग परिग्रह हैं। और खेत, गृह, धन—सुवर्णादि, धान्य गेहूँ आदि, कुप्य वस्त्र आदि, भाण्ड—हींग, मिर्चा आदि, दासदासी—भृत्यवर्ग, हाथी आदि चौपाये सवारी, शय्या-आसन ये दस बाह्य परिग्रह हैं। सोमदेवके उपासकाध्ययनमे यानको नहीं गिनाया है और शय्या तथा आसनको अलग-अलग गिनकर दस संख्याकी पूर्ति की है।

ते च कर्मबन्धन (निबन्धन) मूर्च्छानिमित्तत्वात्त्याज्यतयोपदिष्टा.। यदत्राह—

'मूर्छालक्षणकरणात् सुघटा व्याप्तिः परिग्रहत्वस्य।
सग्रन्थो मूर्छावान् विनापि किल शेषसंगेभ्यः॥' ३
'यद्येवं भवति तदा परिग्रहो न खलु कोऽपि बहिरङ्गः।
भवति नितरां यतोऽसौ धत्ते मूर्च्छानिमित्तत्वम्॥'
'एवमतिव्याप्तिः स्यात्परिग्रहस्येति चेद् भवेन्नैवम्। ६
यस्मादकषायाणा कर्मग्रहणे न मूर्छाऽस्ति॥' [पुरुषार्थ. ११२-११४]

अग सङ्गत्यागविधिमाह— ९

परिमुच्य करणगोचरमरीचिकामुज्झिताखिलारम्भः।
त्याज्यं ग्रन्थमशेषं त्यक्त्वापरनिर्ममः स्वशर्म भजेत्॥१०६॥

करणगोचरमरीचिकां—करणैश्चक्षुरादीन्द्रियैः क्रियमाणा गोचरेषु रूपादिविषयेषु मरीचिका प्रतिनियतवृत्त्यात्मनो मनाक् प्रकाश.। अथवा करणगोचरा इन्द्रियार्था मरीचिका मृगतृष्णेव जलबुद्धया १२

श्वेताम्बर साहित्यमें सिद्धसेन गणिकी तत्त्वार्थटीकामें (७।१२) अन्तरंग परिग्रहकी संख्या तो चौदह बतलायी है किन्तु बाह्य परिग्रहकी संख्या नहीं लिखी। उनमें-से अभ्यन्तर परिग्रहके चौदह भेद हैं—राग, द्वेष, क्रोध, मान, माया, लोभ, मिथ्यादर्शन, हास्य, रति, अरति, भय, शोक, जुगुप्सा और वेद। बाह्य परिग्रह—वास्तु, क्षेत्र, धन, धान्य, शय्या, आसन, यान, कुप्य, द्विपद, त्रिपद, चतुष्पद और भाण्ड हैं।

अभ्यन्तर परिग्रहमें वेदको एक गिना है और रागद्वेषको मिलाकर १४ संख्या पूरी की है। किन्तु बाह्य परिग्रह अलग गिननेसे १२ होते हैं। इसमें त्रिपद नवीन है जो अन्यत्र नहीं है। वैसे इस परम्परामें ९ बाह्य परिग्रह गिनाये हैं। यथा—धर्म संग्रहकी टीकामें कहा है—धन १, धान्य २, क्षेत्र ३, वास्तु ४, रूप्य ५, सुवर्ण ६, कुप्य ७, द्विपद ८, चतुष्पद ९ ये बाह्य परिग्रह हैं। हेमचन्द्रने भी नौ बाह्य परिग्रह कहे हैं॥१०५॥

परिग्रहके त्यागकी विधि कहते हैं—

मरीचिकाके तुल्य इन्द्रिय विषयोंको त्याग कर समस्त सावद्य क्रियाओंको भी त्याग दे। तथा छोड़नेके लिए शक्य गृह-गृहिणी आदि समस्त परिग्रहको त्याग कर, जिसका छोडना शक्य नहीं है ऐसे शरीर आदिमें 'यह मेरा है' या 'यह मैं हूँ' इस प्रकारका संकल्प दूर करके आत्मिक सुखको भोगना चाहिए॥१०६॥

विशेषार्थ—इन्द्रियोंके विषय मरीचिकाके तुल्य हैं। सूर्यकी किरणोंके रेतमें पडनेसे वनमें मृगोंको जलका भ्रम होता है उसे मरीचिका कहते हैं। जैसे मृग जल समझकर उसके लिए दौड़ता है वैसे ही लोग सुख मानकर बडी उत्सुकतासे इन्द्रियोंके विषयोंकी ओर दौड़ते हैं। अतः वे सर्वप्रथम त्यागने चाहिए। उसके बाद समस्त आरम्भको त्यागकर छोड सकने योग्य सभी प्रकारके परिग्रहोंको छोड़ देना चाहिए। बालकी नोकके बराबर भी छोडने योग्य

---


इष्टमृष्टोत्कटरसैराहारैरुद्भटीकृताः ।
३ यथेष्टमिन्द्रियभटा भ्रमयन्ति बहिर्मनः ॥१०॥

बहिः—बाह्यार्थेषु । उक्तं च—

'न केवलमयं काय. कर्शनीयो मुमुक्षुभि ।
६ नाप्युत्कटरसै. पोष्यो मृष्टैरिष्टैश्च वल्भनै. ॥' [ ] ॥१०॥

अथानशन तप सभेद लक्षयति—

चतुर्थाद्यर्धवर्षान्त उपवासोऽथवाऽऽमृतेः ।
९ सकृद्भुक्तिश्च मुक्त्यर्थं तपोऽनशनमिष्यते ॥११॥

चतुर्थादीत्यादि—अहोरात्रमध्ये किल द्वे भक्तवेले । तत्रैकस्या भोजनमेकस्या च तत्याग । एक-भक्तं—धारणकदिने पारणकदिने चैकभक्तमिति द्वयोर्भक्तवेलयो भोजनत्यागो द्वयोश्चोपवासदिने तत्याग इति १२ चतसृषु भक्तवेलासु चतुर्विधाहारपरिहारश्चतुर्थ इति रूढ । एकोपवास इत्यर्थ । एवं षट्सु भक्तवेलासु भोजनत्याग षष्ठो वा(द्वौ) उपवासौ । अष्टासु अष्टमस्त्रय उपवासा. । दशसु दशमश्चत्वार उपवासा । द्वादशसु द्वादश पञ्चोपवासा । एव चतुर्थ आदिर्यस्य षष्ठाद्युपवासस्य चतुर्थादि. । अर्धवर्षं षण्मासा । तद्विषयत्वादुप-१५ वासोऽप्यर्धवर्षमुच्यते । अर्धवर्षं षण्मासोपवासोऽन्त पर्यन्तो यस्य सोऽर्धवर्षान्त. । चतुर्थादिश्चासावर्धवर्षान्तश्च चतुर्थाद्यर्धवर्षान्त उपवास क्षपणं सकृद्भुक्तिश्चैकभक्तम् । इत्येवमवधृतकालमनशनं तप इष्यते । य पुनरामृते-र्मरणं यावदुपवासस्तदनवधृतकालम् । इत्यनशन तपो द्विधाऽत्र सूत्रितं प्रतिपत्तव्यम् । उक्तं च ।

अपनेको रुचिकर स्वादिष्ट आहारके दोष कहते हैं—

इन इन्द्रियरूपी वीरोंको यदि इष्ट, मिष्ट और अत्यन्त स्वादिष्ट आहारसे अत्यधिक शक्तिशाली बना दिया जाता है तो ये मनको बाह्य पदार्थोंमें अपनी इच्छानुसार भ्रमण कराती हैं ॥१०॥

विशेषार्थ—उक्त समस्त कथनका सारांश यही है कि भोजनका और इन्द्रियोंका खास सम्बन्ध है अत साधुका भोजन इतना सात्त्विक होना चाहिए जिससे शरीररूपी गाडी तो चलती रहे किन्तु इन्द्रियाँ बलवान् न हो सके। अतः कहा है—'मध्यम मार्गको अपनाकर जिससे इन्द्रियाँ वशमे हों और कुमार्गकी ओर न जाये ऐसा प्रयत्न करना चाहिए।' तथा—'मुमुक्षुओंको न तो मात्र इस शरीरको सुखा डालना चाहिए और न मीठे रुचिकर और अति रसीले भोजनोंसे इसे पुष्ट ही करना चाहिए' ॥१०॥

आगे भेदसहित अनशन तपको कहते हैं—

मुक्ति अर्थात् कर्मक्षयके लिए चतुर्थ उपवाससे लेकर छह मासका उपवास करना, अथवा मरणपर्यन्त उपवास करना तथा एक बार भोजन करना अनशन नामक तप माना गया है ॥११॥

विशेषार्थ—दिन-भरमे भोजनकी दो वेलाएँ होती हैं। उनमें-से एकमें भोजन करना एक भक्त है। उपवाससे पहले दिनको धारणाका दिन कहते हैं और उपवास समाप्त होनेसे अगले दिनको पारणाका दिन कहते हैं। धारणा और पारणाके दिन एक बार भोजन करनेसे दो भोजन वेलाओंमे भोजनका त्याग करनेसे और उपवासके दिन दो वेला भोजनका त्याग करनेसे इस तरह चार भोजन वेलाओंमे चार प्रकारके आहारके त्यागको चतुर्थ कहते हैं। अर्थात् एक उपवास। इसी तरह छह भोजन वेलाओंमें भोजनके त्यागको षष्ठ या दो

'अद्धानशनं सर्वानशनं द्विविकल्पमनशनमिहोक्तम् ।
विहृतिभृतोद्धानशनं सर्वानशनं तनुत्यागे ॥'
'एकोपवासमूलः षण्मासक्षपणपश्चिमः सर्वः ।
अद्धानशनविभाग स एष वाञ्छानुगं चरतः ॥' [ ]

चशब्दो मध्यमजघन्योपवाससमुच्चयार्थः । नञो निषेधे ईषदर्थे च विवक्षितत्वात्, तेनानशनस्य भाव ईषदनशन वाऽनशनमिति रूढम् । मुक्त्यर्थमिति कर्मक्षयार्थं इष्टफलमंत्रसाधनाद्यनुद्दिश्येत्यर्थ । [illegible] दण्डकाचारादिशास्त्रेषु संवत्सरातीतमप्यनशनं श्रूयते तदप्यर्धं च वर्षं चेत्यर्धवर्षे इत्येकस्य वर्षशब्दस्य लोपं कृत्वा व्याख्येयम् ॥११॥

अथोपवासस्य निरुक्तिपूर्वकं लक्षणमाह—

[1]स्वार्थादुपेत्य शुद्धात्मन्यक्षाणां वसनाल्लयात् ।
उपवासोऽशनस्वाद्यखाद्यपेयविवर्जनम् ॥१२॥

स्वार्थात्—निजनिजविषयात् । उक्तं च—
'उपेत्याक्षाणि सर्वाणि निवृत्तानि स्वकार्यतः ।
वसन्ति यत्र स प्राज्ञैरुपवासोऽभिधीयते ॥' [अमित श्रा., १२।११९]

उपवास कहते हैं। आठ वेलाओंमें भोजनके त्यागको अष्ट या तीन उपवास कहते हैं। दस वेलाओंमें भोजनके त्यागको दसम या चार उपवास कहते हैं। बारह वेलाओंमें भोजनके त्यागको द्वादश या पाँच उपवास कहते हैं। इस प्रकार चतुर्थसे लेकर षट्मासका उपवास अनशन तप है। इसे अवधृतकाल अनशन तप कहते हैं और मरणपर्यन्त भोजनके त्यागको अनवधृतकाल अनशन तप कहते हैं। इस तरह अनशन तपके दो भेद हैं। कहा है—'यहाँ अनशनके दो भेद कहे हैं—एक अद्धानशन और एक सर्वानशन। विहार करनेवाले साधु अद्धानशन करते हैं और शरीर त्यागनेवाले सर्वानशन करते हैं। अर्थात् कालकी मर्यादापूर्वक चार प्रकारके आहारका त्याग अद्धानशन है और मरणपर्यन्त त्याग सर्वानशन है। एक उपवास प्रथम अद्धानशन है और छह मासका उपवास अन्तिम अद्धानशन है। एक उपवाससे लेकर छह मासके उपवासपर्यन्त सब अद्धानशनके भेद हैं। यह इच्छानुसार किया जाता है।' न अशनको अनशन कहते हैं। यहाँ 'न' निषेधके अर्थमें भी है और थोड़ेके अर्थमें भी है। इसलिए अशनके न करनेको या अल्प भोजनको अनशन कहते हैं। यह अनशन तभी तप है जब कर्मक्षयके लिए किया जाये। मन्त्र साधन आदि लौकिक फलके उद्देशसे किया जानेवाला अनशन तप नहीं है। कुछ शास्त्रोंमें एक वर्षसे अधिकका भी अनशन सुना जाता है अत अर्धवर्षान्तका अर्थ 'अर्ध और वर्ष' ऐसा कर लेना चाहिए।

उपवासका निरुक्ति पूर्वक लक्षण कहते हैं—

अपने-अपने विषयोंसे हटकर इन्द्रियोंके राग-द्वेषसे रहित आत्मस्वरूपमें बसने अर्थात् लीन होनेसे अशन, स्वाद्य, खाद्य और पेय चारों प्रकारके आहारका विधिपूर्वक त्यागना उपवास है ॥१२॥

विशेषार्थ—उपवास शब्द उप और वास दो शब्दोंके मेलसे बना है। उपका अर्थ है आना अर्थात् इन्द्रियोंका अपने-अपने विषयोंसे हटकर आना और वासका अर्थ है बसना,

---

1. 'शब्दादिग्रहणं प्रतिनिवृत्तौत्सुक्यानि पञ्चापीन्द्रियाणि उपेत्य तस्मिन् वसन्तीत्युपवासः चतुर्विधाहारपरित्यागः—सर्वार्थसि., ७।२१ ।

परे त्वेवमाहुः—

'उपावृत्तस्य दोषेभ्यो यस्तु वासो गुणैः सह ।
३ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ।' [ ] ॥१२॥

अथानशनादीनां लक्षणमाह—

ओदनाद्यशनं स्वाद्यं ताम्बूलादि-जलादिकम् ।
६ पेयं खाद्यं त्वपूपाद्यं त्याज्यान्येतानि शक्तितः ॥१३॥

उक्तं च—

'मुद्गौदनाद्यमशनं क्षीरजलाद्यं मतं जिनैः पेयम् ।
९ ताम्बूलदाडिमाद्यं स्वाद्यं खाद्यं त्वपूपाद्यम् ॥'

अपि च—

'प्राणानुग्राहि पानं स्यादशनं दमनं क्षुधः ।
१२ खाद्यते यत्नतः खाद्यं स्वाद्यं स्वादोपलक्षितम् ॥' [ ] ॥१३॥

अथोपवासस्योत्तमादिभेदात् त्रिप्रकारस्यापि प्रचुरदुष्कृताशुनिर्जराङ्गत्वाद् यथाविधि-विधेयत्वमाह—

उपवासो वरो मध्यो जघन्यश्च त्रिधापि सः ।
१५ कार्यो विरक्तैर्विधिवद्बह्वागःक्षिप्रपाचनः ॥१४॥

आगः—पापम् ॥१४॥

लीन होना अर्थात् आत्मामें लीन होना। इसीको उपवास कहते है। कहा है—'जिसमें सब इन्द्रियाँ अपने-अपने विषयोंसे निवृत्त होकर बसती हैं उसे विद्वान् उपवास कहते हैं।'

उसका अर्थ जो चार प्रकारके आहारका त्याग लिया जाता है, उसका कारण यह है कि आहार न मिलनेसे सब इन्द्रियाँ म्लान हो जाती हैं। वास्तवमें तो इन्द्रियोंका उपवासी होना ही सच्चा उपवास है और इन्द्रियाँ तभी उपवासी कही जायेंगी जब वे अपने विषयको ग्रहण न करें उधरसे उदासीन रहें। उसीके लिए चारों प्रकारके आहारका त्याग किया जाता है।

अन्य धर्मोंमें उपवासकी निरुक्ति इस प्रकार की है—'दोषोंसे हटकर जो गुणोंके साथ वसना है उसे उपवास जानना चाहिए। उपवासमें समस्त भोगोंका त्याग होता है' ॥१२॥

अशन आदिका लक्षण कहते हैं—

भात-दाल आदि अशन है। पान-सुपारी आदि स्वाद्य है। जल, दूध आदि पेय है। पूरी, लड्डू आदि खाद्य है। इनको शक्तिके अनुसार छोड़ना चाहिए ॥१३॥

विशेषार्थ—अन्यत्र पान आदिका स्वरूप इस प्रकार कहा है—'जो प्राणोंपर अनुग्रह करता है, उन्हें जीवन देता है वह पान या पेय है। जो भूखको मिटाता है वह अशन है। जो यत्नपूर्वक खाया जाता है वह खाद्य है और जो स्वादयुक्त होता है वह स्वाद्य है ॥१३॥'

उत्तम आदिके भेदसे तीन प्रकारका भी उपवास प्रचुर पापोंकी शीघ्र निर्जरामें कारण है। अतः उसको विधिपूर्वक पालनेका उपदेश देते हैं—

उत्तम, मध्यम और जघन्यके भेदसे तीनों भी प्रकारका उपवास प्राणीसंयम और इन्द्रियसंयमके पालकोंको शास्त्रोक्त विधानके अनुसार करना चाहिए। क्योंकि वह शीघ्र ही बहुत-से पापोंकी निर्जराका कारण है ॥१४॥

अथोत्तमादिभेदाना लक्षणान्याह—

धारणे पारणे सैकभक्तो वर्यश्चतुर्विधः ।
साम्बुर्मध्योऽनेकभक्तः सोऽधमस्त्रिविधावुभौ ॥१५॥ ३

चतुर्विध.—चतुर्विधसंज्ञक उपवास. । साम्बुः—सपानीय, धारणे पारणे सैकभक्त इत्येवम् । अनेकभक्त.—धारणे पारणे चैकभक्तरहित साम्बुरित्येवम् । त्रिविधौ—त्रिविधसज्ञौ । उक्त च—

'चतुर्णा तत्र भुक्तीनां त्यागे वर्यश्चतुर्विध. । ६
उपवासः सपानीयस्त्रिविधो मध्यमो मतः ॥'
'भुक्तिद्वयपरित्यागे त्रिविधो गदितोऽधम. ।
उपवासस्त्रिधाऽप्येषः शक्तित्रितयसूचकः ॥' [अमित. श्रा. १२।१२३-१२४] ॥१५॥ ९

अथाशक्तितो भोजनत्यागे दोषमाह—

यदाहारमयो जीवस्तदाहारविराधितः ।
नार्तरौद्रातुरो ज्ञाने रमते न च संयमे ॥१६॥ १२

आहारमय.—आहारेण कवललक्षणेन निर्वृत्त इव । द्रव्यप्राणप्रधानोऽत्र प्राणी । आहारविराधितः—भोजनं हठात्त्याजित ॥१६॥

एतदेव भङ्ग्यन्तरेणाह— १५

उपवासके उत्तम आदि भेदोंका लक्षण कहते हैं—

धारणा और पारणाके दिन एक बार भोजनके साथ जो उपवास किया जाता है वह उत्तम है। उसका नाम चतुर्विध है। धारणा और पारणाके दिन एक बार भोजन करके जिस उपवासमें केवल जल लिया जाता है वह मध्यम है। तथा धारणा और पारणाके दिन दोनों बार भोजन करनेपर भी जिस उपवासमें केवल जल लिया जाता है वह अधम है। इन मध्यम और अधमका नाम त्रिविध है ॥१५॥

विशेषार्थ—भगवती आराधनामें (गा. २०९) अनशनके दो भेद किये हैं—अद्धानशन और सर्वानशन। संन्यास धारण करनेपर जो जीवनपर्यन्तके लिए अशनका त्याग किया जाता है वह सर्वानशन है और कुछ कालके लिए अशनके त्यागको अद्धानशन कहते हैं। आचार्य अमितगतिने इसके उत्कृष्ट, मध्यम और जघन्य भेद कहे हैं। यथा 'चारों प्रकारके आहारका त्याग चतुर्विध नामक उत्तम उपवास है। पानी सहित उपवास त्रिविध नामक मध्यम उपवास है। अर्थात् धारणा और पारणा के दिन एक बार भोजन करे और उपवासके दिन केवल एक बार जल लेवे यह मध्यम त्रिविध नामक उपवास है। तथा धारणा और पारणाके दिन अनेक बार भोजन करके भी उपवास के दिन भी केवल जल ले तो यह अधम त्रिविध उपवास है। यह तीनों ही प्रकारका उपवास उत्तम, मध्यम और अधम शक्तिका सूचक है। शक्तिके अनुसार उपवास करना चाहिए।' श्वेताम्बर परम्परामें भी अनशनके यावज्जीवक तथा चतुर्थ भक्त आदि भेद हैं ॥१५॥

बिना शक्तिके भोजन त्यागनेमें दोष बतलाते हैं—

यत. प्राणी आहारमय है अर्थात् मानो आहारसे ही वह बना है। इसलिए आहार छुड़ा देनेपर उसे आर्त और रौद्रध्यान सताते हैं। अतः उसका मन न ज्ञानमें लगता है और न संयममें लगता है ॥१६॥

इसी बातको दूसरी तरहसे कहते हैं—

प्रसिद्धमन्नं वै प्राणा नृणां तत्त्याजितो हठात् ।
नरो न रमते ज्ञाने दुर्ध्यानार्तो न संयमे ॥१७॥

३　स्पष्टम् ॥१७॥

अथ दीर्घे सत्यायुषि नित्यनैमित्तिकांश्चोपवासान् यथाशक्ति विधाय तच्छेषमनेनैव नयेदिति शिक्षार्थमाह—

६　तन्नित्यनैमित्तिकभुक्तिमुक्ति-
विधीन् यथाशक्ति चरन् विलङ्घ्य ।
दीर्घं सुधीर्जीवितवर्त्म युक्त-
९　स्तच्छेषमत्ये त्वशनोज्झयैव ॥१८॥

नित्या—लुञ्चाद्याश्रया । नैमित्तिका.—कनकावल्याद्याश्रया । एतेषा लक्षण टीकाराधनाया बोध्यम् । युक्त —समाहित सन् । अशनोज्झया—अनशनेन भक्तप्रत्याख्यानेङ्गिनीप्रायोपगमनमरणानामन्यतमेनेत्यर्थ ।
१२　॥१८॥

अथानशनतपसि प्ररोचनामुत्पादयन्नाह—

प्राञ्च. केचिदिहाप्युपोष्य शरदं कैवल्यलक्ष्म्याऽरुचन्
१५　षण्मासानशनान्तवश्यविधिना तां चक्रुरुत्कां परे ।
इत्यालम्बितमध्यवृत्त्यनशनं सेव्यं सदार्यैस्तनुं
तप्ता शुद्धचति येन हेम शिखिना मूषामिवात्माऽऽवसन् ॥१९॥

१८　प्राञ्च —पूर्वपुरुषा । केचित्—बाहुबल्यादय । शरद—सवत्सरं यावत् । परे—पुरुदेवादय । शुद्धचति—द्रव्यभावकर्मभ्या किट्टकालिकाभ्या च मुच्यत इत्यर्थ ॥१९॥

मनुष्योंका प्राण अन्न ही है यह कहावत प्रसिद्ध है। जबरदस्ती उस अन्नको छुड़ा देनेपर खोटे ध्यानमे आसक्त मनुष्य न ज्ञानमें ही मन लगाता है और न सयममें मन लगाता है ॥१७॥

आगे यह शिक्षा देते हैं कि यदि आयु लम्बी हो तो यथाशक्ति नित्य-नैमित्तिक उपवास करके शेष आयुको उपवासपूर्वक ही बितावे—

यत. सिद्धान्तमें अनशन तपके गुण उक्त रूपसे कहे हैं अत. बुद्धिमान् साधुको शक्तिके अनुसार भोजनको त्यागनेके जो नित्य और नैमित्तिक विधियाँ है उन्हें पालते हुए लम्बे जीवनके मार्गको बितावे। उसके शेष भागको भक्तप्रत्याख्यान, इंगिनीमरण या प्रायोपगमनमरणमें-से किसी एक अनशनके द्वारा ही बितावे ॥१८॥

विशेषार्थ—केशलोंच आदिके दिन मुनिको उपवास करनेका जो नियम है वह नित्यविधि है। तथा कनकावली, सिंहनिष्क्रीडित आदि जो अनेक प्रकारके व्रत कहे हैं वे नैमित्तिक हैं। जिनसेनके हरिवंशपुराणके ३४वें अध्यायमे उनका स्वरूप कहा है ॥१८॥

अनशन तपमें विशिष्ट रुचि उत्पन्न कराते हैं—

इसी भरत क्षेत्रमें बाहुबली आदि कुछ पूर्वपुरुष एक वर्ष तक उपवास करके केवलज्ञानरूप लक्ष्मीसे सुशोभित हुए। दूसरे भगवान् ऋषभदेव वगैरहने चतुर्थभक्त उपवाससे लेकर छह महीनेके उपवासरूप वशीकरण प्रयोगके द्वारा ही उस केवलज्ञानरूप लक्ष्मीको उत्कण्ठित कर दिया। इसलिए मुमुक्षुओंको सदा मध्यमवृत्तिका आलम्बन लेकर अनशन करना चाहिए

१. [illegible]

अथ स्वकारणचतुष्टयादुद्भवन्तीमाहारसंज्ञामाहारादिदर्शनादिप्रतिपक्षभावनया निगृह्णीयादित्यनुशास्ति—

भुक्त्यालोकोपयोगाभ्यां रिक्तकोष्ठतयाऽसतः ।
वेद्यस्योदीरणाच्चान्नसंज्ञामभ्युद्यतीं जयेत् ॥२०॥ ३

भुक्त्यालोकोपयोगाभ्यां—आहारदर्शनेन तदुपयोगेन च । आहारं प्रति मनःप्रणिधानेनेत्यर्थः । असतः—असातसंज्ञस्य ॥२०॥

अथानशनतपोभावनाया नियुङ्क्ते— ६

शुद्धस्वात्मरुचिस्तमीक्षितुमपक्षिप्याक्षवर्गं भजन्
निष्ठासौष्ठवमङ्गनिर्ममतया दुष्कर्मनिर्मूलनम् ।
श्रित्वाऽब्दानशनं श्रुतार्पितमनास्तिष्ठन् धृतिन्यक्कृत- ९
द्वन्द्वः कर्हि लभेय दोर्बलितुलामित्यस्त्वनाश्वांस्तपन् ॥२१॥

अपक्षिप्य—विषयेभ्यो व्यावृत्य । श्रित्वा—प्रतिज्ञाय । तिष्ठन्—उद्धः सन् । धृतिन्यक्कृतद्वन्द्वः—धृतिः आत्मस्वरूपधारणं स्वरूपविषया प्रसक्तिर्वा । तया न्यक्कृतानि अभिभूतानि द्वन्द्वानि परीषहा येन । १२ कर्हि लभेय—कदा प्राप्नुयामहम् । दोर्बलितुलां—बाहुबलिकक्षाम् । तच्चर्या आर्षे यथा—

'गुरोरनुमतोऽधीती दधदेकविहारताम् ।
प्रतिमायोगमावर्षमातस्थे किल संवृत. ॥' १५
'स शंसितव्रतोऽनाश्वान् वनवल्लीततान्तिकः ।
वल्मीकरन्ध्रनि.सर्पत् सर्पैरासीद् भयानकः ॥' [महापु ३६।१०६-१०७]

इत्यादि प्रबन्धेन । अनाश्वान्—अनशनव्रत. ॥२१॥ १८

जिससे तप्त हुए शरीरमें रहनेवाला आत्मा आगसे तपी हुई मूषामें रखे हुए स्वर्णके समान शुद्ध हो जाता है। अर्थात् जैसे स्वर्णकारकी मूषामें रखा हुआ स्वर्ण आगकी गर्मीसे शुद्ध हो जाता है वैसे ही शरीरमें स्थित आत्मा अनशन तपके प्रभावसे शुद्ध हो जाता है ॥१९॥

आगे चार कारणोंसे उत्पन्न होनेवाली आहारसंज्ञाका प्रतिपक्ष भावनासे निग्रह करनेका उपदेश देते हैं—

भोजनको देखनेसे, भोजनकी ओर मन लगानेसे, पेटके खाली होनेसे तथा असातावेदनीय कर्मकी उदीरणा होनेसे उत्पन्न होनेवाली भोजनकी अभिलाषाको रोकना चाहिए ॥२०॥

विशेषार्थ—आगममें आहारसंज्ञाके ये ही चार कारण[1] कहे हैं—'आहारके देखनेसे, उसकी ओर मन लगानेसे, पेटके खाली होनेसे तथा असातावेदनीयकी उदीरणा होनेसे आहारकी अभिलाषा होती है' ॥२०॥

अनशन तपकी भावनामें साधुओंको नियुक्त करते हैं—

शुद्ध निज चिद्रूपमें श्रद्धालु होकर, उस शुद्ध निज आत्माका साक्षात्कार करनेके लिए, स्पर्शन आदि इन्द्रियोंको विषयोंसे हटाकर चारित्रका सुचारुतासे पालन करते हुए, शरीरसे ममत्वको त्यागकर, अशुभ कर्मोंकी निर्जरा करनेवाले एक वर्षके उपवासकी प्रतिज्ञा लेकर, श्रुतज्ञानमें मनको लगाकर, खड़ा होकर, आत्मस्वरूपकी धारणाके द्वारा परीषहोंको निरस्त

---

१. आहारदसणेण य तस्सुवजोगेण ओमकोठाए ।
सादिदरुदीरणाए हवदि हु आहारसण्णा' ।—गो. जीव. १३५ ।

अथावमौदर्यलक्षणं फलं चाह—

ग्रासोऽश्रावि सहस्रतन्दुलमितो द्वात्रिंशदेतेऽशनं
पुंसो वैश्रसिकं स्त्रियो विचतुरास्तद्धानिरौचित्यतः ।
ग्रासं यावदथैकसिक्थमवमोदर्यं तपस्तच्चरे-
द्धर्मावश्यकयोगधातुसमतानिद्राजयाद्याप्तये ॥२२॥

अश्रावि—श्रावित शिष्टैस्तेभ्य श्रुतो वा । वैश्रसिक—स्वाभाविकम् । विचतुराः—विगताश्चत्वारो येषा ते, अष्टाविंशतिर्ग्रासा इत्यर्थ । औचित्यत.—एकोत्तरश्रेण्या चतुर्थादिभागत्यागाद्वा । उक्तं च—

'द्वात्रिंशाः कवल पुस. आहारस्तृप्तये भवेत् ।
अष्टाविंशतिरेवेष्टा. कवलाः किल योषितः ॥'
'तस्मादेकोत्तरश्रेण्या यावत्कवलमात्रकम् ।
ऊनोदरं तपो ह्येतद् भेदोऽपीदमिष्यते ॥' [ ]

अवमौदर्यं—अतृप्तिभोजनम् । तपः—तपोहेतुत्वाद् यूनतापरिहाररूपत्वात् । योग.—आतपनादि सुध्यानादिश्च । धातुसमता—वाताद्यवैषम्यम् । निद्राजयादि, आदिशब्देन इन्द्रियप्रद्वेषनिवृत्त्यादिः । उक्तं च—

'धर्मावश्यकयोगेषु ज्ञानादावुपकारकृत् ।
दर्पहारीन्द्रियाणा च ज्ञेयमूनोदरं तप ॥' [ ] ॥२२॥

करके मैं बाहुबलीके समान अवस्थाको कब प्राप्त करूँगा, ऐसी भावनावाला अनशन तपका पालक होता है ॥२१॥

विशेषार्थ—स्वामी जिनसेनने बाहुबलीकी चर्याके सम्बन्धमें कहा है—'गुरुकी आज्ञासे एकाकी विहार करते हुए बाहुबली एक वर्ष तक प्रतिमा योग धारण करके स्थिर हो गये। प्रशंसनीय व्रती अनशन तपधारी बाहुबली वनकी लताओंसे आच्छादित हो गये। बाँबीके छिद्रोंसे निकलनेवाले साँपों-से वे बड़े डरावने लगते थे' ॥२१॥

इस प्रकार अनशन तपका विस्तारसे कथन किया ।

अब अवमौदर्य तपका लक्षण और फल कहते हैं—

शिष्ट पुरुषोंसे सुना है कि एक हजार चावलका एक ग्रास होता है। पुरुषका स्वाभाविक भोजन ऐसे बत्तीस ग्रास है और स्त्रीका स्वाभाविक भोजन उससे चार ग्रास कम अर्थात् अट्ठाईस ग्रास है। उसमें-से यथायोग्य एक-दो-तीन आदि ग्रासोंको घटाते हुए एक ग्रास तक अथवा एक चावल तक ग्रहण करना अवमौदर्य तप है। यह तप उत्तम, क्षमा आदि रूप धर्मकी, छह आवश्यकोंकी, आतापन आदि योगकी प्राप्तिके लिए, वायु आदिकी विषमताको दूर करनेके लिए, निद्राको जीतने आदिके लिए किया जाता है ॥२२॥

विशेषार्थ—अवमोदर्य तपका स्वरूप अन्यत्र भी इसी प्रकार कहा है—'बत्तीस ग्रास प्रमाण आहार पुरुषकी तृप्तिके लिए होता है और स्त्रीकी तृप्तिके लिए अट्ठाईस ग्रास प्रमाण आहार होता है। उससे एक-दो-तीन आदिके क्रमसे घटाते हुए एक ग्रास मात्र लेना ऊनोदर तप है। ग्रासके अनुसार उसके भी भेद माने गये हैं।'

कहीं-कहीं ग्रास का प्रमाण मुर्गी के अण्डेके बराबर भी कहा[1] है। यथा—'मुर्गीके

---

१ कुक्कुटाण्डसमग्रासा द्वात्रिंशद्भोजनं मतम् ।
तदेकद्वित्रिभागोनमवमौदर्यमीर्यते ॥

अथ बह्वाशिनो दोषानाह—

बह्वाशी चरति क्षमादिदशकं दृप्यन्न नावश्यका-
न्यक्षूणान्यनुपालयत्यनुषजत्तन्द्रस्तमोऽभिद्रवन् । ३
ध्यानाद्यर्हति नो समानयति नाप्यातापनादीन्वपुः
शर्मासक्तमनास्तदर्थमनिशं तत्स्यान्मिताशी वशी ॥२३॥

तमोऽभिद्रवन्—मोहमभिगच्छन् । समानयति—प्रत्यानयति सम्पूर्णीकरोति वा ॥२३॥ ६

अथ मिताशनादिन्द्रियाणां प्रद्वेषाभावं वशवर्तित्वं च दर्शयति—

नाक्षाणि प्रद्विषन्त्यन्नप्रति क्षयभयान्न च ।
दर्पात् स्वैरं चरन्त्याज्ञामेवानूद्यन्ति भृत्यवत् ॥२४॥ ९

अन्नप्रति—अन्नस्य मात्रया स्तोकाहारेण इत्यर्थः । उपवासादिन्द्रियाणां क्षयभयं स्यात् । 'अन्नप्रति' इत्यत्र 'स्तोके प्रतिना' इत्यनेन अव्ययीभावः । आज्ञामेवानु—आज्ञयैव सह । उद्यन्ति—उत्थानं कुर्वन्ति ॥२४॥ १२

अथ मिताशिनो गुणविशेषमाह—

शमयत्युपवासोत्थवातपित्तप्रकोपजाः ।
रुजो मिताशी रोचिष्णु ब्रह्मवर्चसमश्नुते ॥२५॥ १५

रोचिष्णु—दीपनशीलम् । ब्रह्मवर्चसं—परमात्मतेजः श्रुतज्ञानं वा ॥२५॥

अथ वृत्तिपरिसंख्यानतपसो लक्षणं तदाचरणफलं चोपदिशति—

अण्डे प्रमाण बत्तीस ग्रास भोजन माना है। उसमें एक या दो या तीन भाग कम करना अवमौदर्य है।

इसके लाभ बतलाते हुए कहा है—'यह ऊनोदर तप धर्म, आवश्यक, ध्यान और ज्ञानादिकी प्राप्तिमें उपकारी होता है तथा इन्द्रियोंके मदको दूर करता है' ॥२२॥

बहुत भोजन करनेके दोष कहते हैं—

बहुत अधिक भोजन करनेवाला साधु प्रमादी होकर उत्तम, क्षमादि रूप दस धर्मोंको नहीं पालता, न आवश्यकोंको निर्दोष और सम्पूर्ण रूपसे पालता है। उसे सदा तन्द्रा सताती है, इसलिए मोहसे अभिभूत होकर ध्यान, स्वाध्याय वगैरह भी नहीं करता। शारीरिक सुखमें मनके आसक्त होनेसे आतापनयोग, वर्षायोग आदिको भी पूरा नहीं करता। इसलिए धर्मादिकी पूर्तिके लिए मुनिको सदा मितभोजी होना चाहिए ॥२३॥

आगे कहते हैं कि परिमित भोजन करनेसे इन्द्रियाँ अनुकूल और वशमें रहती हैं—

अल्प आहारसे इन्द्रियाँ मानो उपवाससे इन्द्रियोंका क्षय न हो जाये, इस भयसे अनुकूल रहती हैं और मदके आवेशमें स्वच्छन्द नहीं होती हैं। किन्तु सेवककी तरह आज्ञानुसार ही चलती हैं ॥२४॥

मित भोजनके विशेष गुण कहते हैं—

उपवासके द्वारा वात-पित्त कुपित हो जानेसे उत्पन्न हुए रोग अल्पाहारसे शान्त हो जाते हैं। तथा परिमितभोजी प्रकाशस्वभाव परमात्म तेजको अथवा श्रुतज्ञानको प्राप्त करता है ॥२५॥

आगे वृत्तिपरिसंख्यान तपका लक्षण और उसका फल कहते हैं—

भिक्षागोचरचित्रदातृचरणामत्रान्नसद्मादिगात्
संकल्पाच्छ्रमणस्य वृत्तिपरिसंख्यान तपोऽङ्गस्थिति ।
३ नैराश्याय तदाचरेन्निजरसासृग्मांससंशोषण-
द्वारेणेन्द्रियसंयमाय च परं निर्वेदमासेदिवान् ॥२६॥

भिक्षेत्यादि—भिक्षणाश्रितनानाविधदायकादि-विषयमभिसन्धिमाश्रित्य यतेराहारग्रहण वृत्तिपरिसंख्यान-
६ मित्याख्यायते इत्यर्थ । उक्त च—

'गोयरपमाणदायकभायणणाणाविहाण जं गहण ।
तह एसणस्स गहण विविहस्स य वुत्तिपरिसखा ॥' [मूलाचार, गा. ३५५]

भिक्षासे सम्बद्ध दाता, चलना, पात्र, अन्न, गृह आदि विपयक अनेक प्रकारके संकल्पसे श्रमणका शरीरके लिए वृत्ति करना वृत्तिपरिसंख्यान नामक तप है। यह तप आशाकी निवृत्तिके लिए और अपने शरीरके रस, रुधिर और मांसको सुखानेके द्वारा इन्द्रिय संयमके लिए संसार, शरीर और भोगोंसे परम वैराग्यको प्राप्त मुमुक्षुको करना चाहिए ॥२६॥

विशेषार्थ—साधु जब भोजनके लिए निकलता है तो भिक्षासे सम्बद्ध दाता आदिके सम्बन्धमें कुछ संकल्प कर लेता है। जैसे—ब्राह्मण या क्षत्रिय आदि और वह भी वृद्ध या बालक या युवा हुआ, अथवा जूते पहने हो या मार्गमे खडा हो या हाथी पर चढा हो, या अन्य किसी प्रकारका दाता यदि आज मुझे पड़गाहेगा तभी मैं ठहरूँगा अन्यथा नहीं। इसी प्रकारका संकल्प स्त्रीके विषयमें भी जानना। इस प्रकार दाताविपयक अनेक संकल्प होते हैं। तथा जिस गलीसे जाऊँगा उसी गलीसे पीछे लौटनेपर यदि भिक्षा मिली तो स्वीकार करूँगा अन्यथा नहीं। इसी तरह सीधी गलीसे या गोमूत्रके आकारवाली टेढी-मेढी गलीसे, या चौकोर आकारवाली गलीसे जानेपर भिक्षा मिलेगी तो लूँगा। या अन्दर जानेसे लेकर बाहर निकलने तक यदि पतंगोंके भ्रमणके आकारमे या गोचरीके आकारमें भ्रमण करते हुए भिक्षा मिली तो स्वीकार करूँगा। इस प्रकारके मार्ग विषयक अनेक संकल्प हैं। तथा यदि सुवर्णके या चाँदीके या मिट्टीके पात्रसे भिक्षा देगा तो स्वीकार करूँगा, अन्यथा नहीं। इस प्रकारके पात्रविषयक संकल्प हैं। तथा यदि पिण्डभूत आहार या बहुत पतला पेय, या जौकी लपसी, या मसूर, चना, जौ आदि धान्य, अथवा शाक, कुल्माष आदिसे मिला हुआ भात या शाकके मध्यमें रखा हुआ भात, या चारों ओर व्यंजनके मध्यमें रखा हुआ अन्न, या व्यंजनके मध्यमें पुष्पावलीके समान रखाहुआ सिक्थक, अथवा शाक आदि व्यंजन मिलेगा तो भिक्षा लूँगा, अन्यथा नहीं। या जिससे हाथ लिप्त हो जाये ऐसा कोई गाढा पेय या जो हाथको न लग सके ऐसा कोई खाद्य पेय, सिक्थक सहित पेय या सिक्थक रहित पेय मिलेगा तो आहार ग्रहण करूँगा, अन्यथा नहीं। ये अन्नविषयक संकल्प हैं। तथा अमुक घरोंमें जाऊँगा या इतने घरोंमे जाऊँगा, इससे अधिकमे नहीं। यह घर विषयक संकल्प है। आदि शब्दसे मुहल्ला आदि लिये जाते हैं। यथा इसी मुहल्लेमें प्रवेश करनेपर भिक्षा मिली तो स्वीकार करूँगा या एक ही मुहल्लेमे या दो ही मुहल्लेमे जाऊँगा। तथा अमुक घरके परिकर रूपसे लगी हुई भूमिमे जाकर भिक्षा मिली तो स्वीकार करूँगा। इसे कुछ निवसन कहते हैं। दूसरे कुछ ग्रन्थकार कहते हैं कि पाटक (मुहल्ला) की भूमिमे ही प्रवेश करूँगा घरोंमे नहीं, इस प्रकारके संकल्पको पाटकनिवसन कहते हैं। अतः इन दोनोंको ही ग्रहण कर लेना चाहिए। तथा एक या दो ही भिक्षा ग्रहण करूँगा, यह भिक्षाविषयक संकल्प है। तथा एक दाताके

तद्यथा—ब्राह्मण क्षत्रियादिर्वा सोऽपि वृद्धो बालयुवाद्यवस्थो वा सोपानत्को मार्गस्थो हस्त्याद्यारूढो-ऽन्यथा वा यद्यद्य मा धरेत् तदानी तिष्ठामि, नान्यथा । एवं स्त्रियामपि योज्यम् । एवविधो बहुविधो दातृविषय-सकल्प । तथा यया वीथ्या गच्छामि पूर्वं तयैव प्रत्यागच्छन् यदि भिक्षा लभेय तदा गृह्णीया नान्यथा । एव प्राञ्जल वीथ्यागच्छन् गोमूत्रिकाकार वा चतुरस्राकार वा अभ्यन्तरमारभ्य वहिर्नि सरणेन वा शलभमाला-भ्रमणाकार वा गोचर्याकारं वा भ्राम्यन् यद्यद्य भिक्षां लभेय तदा गृह्णीयाम्—इत्यादिरनेकविधश्चरणविषय. । तथा यदि पिण्डभूत द्रवबहुलतया पेय वा यवागूं वा मसूरचणकयवादिधान्य वा शाककुल्माषादिसंसृष्टं वा समन्ता-दवस्थितशाकमध्यावस्थितौदन वा परित स्थितव्यञ्जनमध्यस्थितान्न वा व्यञ्जनमध्ये पुष्पावलीवदवस्थितसिक्थक वा निष्पावाद्यमिश्रितान्न वा शाकव्यञ्जनादिक वा हस्तलेपकारि [-तदलेपकारि वा] वा निसिक्थ ससिक्थं वा पानक वाद्याभ्यवहरामि नान्यदित्यादिरन्नविषय । तथा एतेष्वेतावत्सु वा गृहेषु प्रविशामि नान्येषु बहुषु इति सद्म-विषय. । आदिशब्दात्पाटकादयो गृह्यन्ते । तत्र इममेव पाटकं प्रविश्य लब्धा भिक्षा गृह्णामि नान्याम् । एकमेव पाटक द्वयमेव वेति । तथा अस्य गृहस्य परिकरतयाऽवस्थिता भूमिं प्रविश्य गृह्णामि इत्यभिग्रहो निवसन-मित्युच्यते इति केचिद् वदन्ति । अपरे पाटकस्य भूमिमेव प्रविशामि न पाटकगृहाणीति संकल्प पाटकनिवसन-मित्युच्यते इति कथयन्ति । तदुभयमपि च गृह्यते । तथा एका भिक्षा द्वे एव वा गृह्णामि नाधिकामिति भिक्षा-परिमाणम् । तथा एकेनैवादीयमान द्वाभ्यामेवेति वा दातृक्रियापरिमाणम् । आनीतायामपि भिक्षायामियत एव ग्रासानियन्त्येव वा वस्तून्येतावन्तमेव कालमेतस्मिन्नेव काले गृह्णामीति वा परिमाण गृह्यत इति । तदुक्तं—

'गत्वा प्रत्यागतमृजुविधिश्च गोमूत्रिका तथा पेटा ।
शम्बूकावर्तविधि. पतङ्गवीथी च गोचर्या ॥
पाटकनिवसन-भिक्षापरिमाण-दातृदेयपरिमाणम् ।
पिण्डाशनपानाशनखिच्चयवागूर्जतपशीतः (-गूर्व्रतयति स.) ॥
संसृष्टफलकपरिखा. पुष्पोपहृतं च शुद्धकोपहृतम् ।
लेपकमलेपकं पानक च नि सिक्थिकं ससिक्थ च ॥
पात्रस्य दायकादेरवग्रहो बहुविधः स्वसामर्थ्यात् ।
इत्येवमनेकविधा विज्ञेया वृत्तिपरिसंख्या ॥' [भ आ., गा २१८-२२१ का रूपान्तर] ॥२६॥

द्वारा या दो दाताओंके द्वारा दिया गया आहार ग्रहण करूँगा। यह दातृक्रियाका परिमाण है। लायी हुई भिक्षामें-से भी इतने ही ग्रास लूँगा या इतनी ही वस्तु लूँगा या इतने काल तक ही लूँगा या अमुक कालमे लूँगा इस प्रकारका भी परिमाण किया जाता है। श्वेताम्बर पर-म्परामे साधु पात्रमे भिक्षा ग्रहण करते है। अतः वृत्तिपरिसंख्यान तपमे वे नियम करते हैं कि एक वारमे या दो या तीन वारमे जितना देगा उतना ही लूँगा। हाथ से या करछुलसे उठाकर जो दिया जाता है उसे भिक्षा कहते हैं। उसकी भी गिनती गोचरीके लिए जाते हुए कर ली जाती है। इस तरह साधु अभिग्रहको करके भिक्षाके लिए भ्रमण करता है। यह अभिग्रह द्रव्य, क्षेत्र, काल और भावके भेदसे चार प्रकारका होता है। द्रव्यसे जैसे, सत्तू या कुल्माषमिश्रित अन्न या केवल भात या तक्र या आचाम्ल ग्रहण करूँगा। क्षेत्रसे जैसे, देहलीको दोनों जंघाओंके मध्यमे करके भिक्षा लूँगा। कालसे—जब सब भिक्षा लेकर लौट जायेंगे तब भिक्षा लूँगा। भावसे जैसे, यदि दाता हँसते हुए या रोते हुए देगा, या दाता साँकलसे बँधा होगा, तो भिक्षा ग्रहण करूँगा। इस प्रकार कोई एक द्रव्यादिका अभिग्रह करके शेपका त्याग करना वृत्तिपरिसंख्यान तप है। (तत्त्वार्थ टीका—सिद्धसेन गणि ९।१९) ॥२६॥

१. देखो, भग. आरा , गा २१८-२२१ की विजयोदया टीका ।

अथ रसपरित्यागलक्षणार्थमाह—

त्याग. क्षीरदधीक्षुतैलहविषां षण्णां रसानां च यः
३ कात्स्न्येनावयवेन वा यदसनं सूपस्य शाकस्य च ।
आचाम्लं विकटौदनं यददनं शुद्धौदनं सिक्थवद्
रूक्षं शीतलमप्यसौ रसपरित्यागस्तपोऽनेकधा ॥२७॥

६ इक्षु —गुडखण्डमत्स्यण्डिकादि । हवि —घृतम् । अवयवेन—एकद्वित्र्याद्यवच्छेदेन । असनं—वर्जनम् । आचाम्ल—असस्कृतसौवीरमिश्रम् । विकटौदन—अतिपक्वमुष्णोदकमिश्रं वा । शुद्धौदनं—केवलभक्तम् । सिक्थवत्—सिक्थाढ्यमल्पोदकमित्यर्थ । अपि—श्रेष्ठानामिष्टरूपरसगन्धस्पर्शोपेताना परमान्न-
९ पानफलभक्षौषधादीना रूपवलवीर्यगृद्धिदर्पवर्धनाना स्वादूनामाहाराणा महारम्भप्रवृत्तिहेतूनामनाहरण-संग्रहणार्थं ॥२७॥

अथ य सविग्न सर्वज्ञाज्ञादृढबद्धादरस्तप समाधिकामश्च सल्लेखनोपक्रमात् पूर्वमेव नवनीतादिलक्षणा-
१२ श्चतस्रो महाविकृतीर्यावज्जीव त्यक्तवान् स एव रसपरित्याग वपु.सल्लेखनाकामो विशेषेणाभ्यसितुमर्हतीत्युपदेशार्थं वृत्तद्वयमाह—

रसपरित्याग तपका लक्षण कहते हैं—

दूध, दही, इक्षु—गुड, खाँड, शर्करा आदि, तेल और घी इन छह रसोका जो पूर्णरूपसे या इनमे-से एक-दो आदिका त्याग है उसे रसपरित्याग कहते हैं। मूँग आदिका और शाकका सर्वथा त्यागना या किसी दाल, शाक आदिके त्यागनेको भी रसपरित्याग कहते हैं। आचाम्लका, अति पके हुए और गरम जल मिले भातका, या केवल भातका, या अल्प जलवाले भातका, या रूक्ष आहारका, या शीतल आहारका खाना भी रसपरित्याग है। श्लोकके 'अपि' शब्दसे श्रेष्ठ, इष्ट रूप, रस, गन्ध और स्पर्शसे युक्त उत्तम अन्न, पान, फल, औषध आदि तथा रूप, वल, वीर्य, तृष्णा और मदको बढानेवाला तथा महान् आरम्भ और प्रवृत्तिके कारणभूत स्वादिष्ट आहारको ग्रहण नहीं करना चाहिए। इस तरह रसपरित्याग अनेक प्रकारका होता है ॥२७॥

विशेषार्थ—भगवती आराधना (गा. २१५-२१७) में रसपरित्यागमे उक्त प्रकारसे त्याग वतलाया है। तत्त्वार्थवार्तिक आदि सभी प्राचीन ग्रन्थोंमें रसपरित्यागमें घी, दूध, दही, गुड-शक्कर और तेलके त्यागका मुख्य रूपसे निर्देश मिलता है क्योंकि इनकी गणना इन्द्रियमदकारक वृष्य पदार्थोंमे है। उमास्वातिके तत्त्वार्थाधिगम भाष्य (९९-१९) में रसपरित्यागके अनेक भेद कहे है—जैसे मद्य, मांस, मधु और मक्खन इन विकारकारी रसोंका त्याग और विरस रूक्ष आदि आहारका ग्रहण। टीकाकार सिद्धसेन गणिने आदि पदसे दूध, दही, गुड, घी और तेलका ग्रहण किया है। इससे प्रतीत होता है कि दोनों परम्पराओंमे 'रस' से इन पाँचोका मुख्य रूपसे ग्रहण होता था। क्योंकि ये वृष्य हैं, इन्द्रियोंको उद्दीप्त करते है। प. आशाधरजीने इनके साथ ही खट्टा, मीठा, तीता, कटुक, कसैला और लवण इन छह रसोंमें-से एक, दो या सबके त्यागको भी रसपरित्यागमे स्पष्ट कर दिया है। मिष्टरसके त्यागमे और इक्षुरसके त्यागमे अन्तर है। मिष्टरसका त्यागी मीठे फलोंका सेवन नहीं कर सकता किन्तु इक्षुरसका त्यागी कर सकता है ॥२७॥

जो संसारसे उद्विग्न है, सर्वज्ञके वचनोमे दृढ आस्था रखता है, तप और समाधिका इच्छुक है, सल्लेखना प्रारम्भ करनेसे पहले ही मक्खन आदि चार महाविकृतियोंको जीवन

काङ्क्षाकृन्नवनीतमक्षमदसृण्मांसं प्रसङ्गप्रदं
मद्यं क्षौद्रमसंयमार्थमुदितं यद्यच्च चत्वार्यपि ।
सम्मूर्छालसवर्णजन्तुनिचितान्युच्चैर्मनोविक्रिया-
हेतुत्वादपि यन्महाविकृतयस्त्याज्यान्यतो धार्मिकैः ॥२८॥ ३
इत्याज्ञां दृढमार्हतीं दधदघाद्भीतोऽत्यजत् तानि य-
श्चत्वार्येव तपःसमाधिरसिकः प्रागेव जीवावधि ।
अभ्यस्येत्स विशेषतो रसपरित्यागं वपुः संलिखन्
स्याद्दूषीविषवद्धि तन्वपि विकृत्यङ्गं न शान्त्यै श्रितम् ॥२९॥ ६

काक्षाकृत्—गृद्धिकरम् । अक्षमदसृट्—इन्द्रियदर्पकारि । प्रसङ्गप्रदं—पुनः पुनस्तत्र वृत्तिरगम्यागमनं वा प्रसङ्गस्तं प्रकर्षेण ददाति । असंयमार्थं—रसविषयकरागात्मक इन्द्रियासयम , रसजजन्तुपीडालक्षणश्च प्राणासयमः । तन्निमित्तम् । संमूर्छालाः—सन्मूर्छनप्रभवा' । सवर्णाः—स्वस्य योनिद्रव्येण समानवर्णा । उच्चैर्मनोविक्रियाहेतुत्वात्—महाचेतोविकारकारणत्वात् । धार्मिकैः—धर्ममहिंसालक्षणं चरद्भिः ॥२८॥ ९ १२

दृढं—सर्वज्ञाज्ञालङ्घनादेव दुरन्तससारपातो ममाभूद् भविष्यति च तदेना जातुचिन्न लङ्घयेयमिति निर्बन्धं कृत्वेत्यर्थः । तप.समाधिरसिक.—तपस्येकाग्रता तप समाधी वा [illegible]न्तमाकाङ्क्षन् । उक्तं च—

'चत्तारि महाविगडीओ होंति णवणीदम[illegible]मंसमहू । १५
कंखा-पसंग-दप्पासंजमकारीओ एदाओ ॥
आणाभिकंखिणावज्जभीरुणा तवसमाधिकामेण ।
ताओ जावज्जीवं णिव्वूढाओ पुरा चेव ॥' [मूलाचार, गा ३५३-३५४] १८

दूषीविषवत्—मन्दप्रभावविषमिव । उक्तं च—

'जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवातातपशोषित वा ।
स्वभावतो वा न गुणैरुपेतं दूषीविषाख्यं विषमभ्युपैति ॥' [ ] २१

तन्वपि—अल्पमपि ॥२९॥

पर्यन्त छोड़ चुका है, वही शरीरको कृश करनेकी इच्छासे रसपरित्यागका विशेष रूप[illegible] अभ्यास करनेका पात्र है, यह बात दो पद्योंसे कहते हैं—

नवनीत—मक्खन तृष्णाको बढाता है, मांस इन्द्रियोंमें मद पैदा करता है। मद्य जो एक बार पी लेता है बार-बार पीना चाहता है। साथ ही, अभोग्य नारीको भी भोगनेकी प्रेरणा करता है। शहद असंयमका कारण है। असंयम दो प्रकारका होता है—इन्द्रिय असंयम और प्राणी असंयम। रसविषयक अनुरागको इन्द्रिय असंयम कहते हैं और रसमें रहनेवाले जीवोंको पीड़ा होना प्राणी असंयम है। शहदके सेवनसे दोनों असंयम होते हैं। दूसरी बात यह है कि इन चारोंमें ही उसी रंगके सम्मूर्च्छन जीव भरे हैं। तीसरी बात यह है कि ये उच्च मनोविकारमें कारण हैं। इनके सेवनसे मन अत्यधिक विकारयुक्त होता है। इसीलिए इन्हें महाविकृति कहा है। अतः अहिंसा धर्मके पालकोंको इन्हें त्यागना चाहिए। जिन भगवान्‌की इस आज्ञाको दृढ रूपसे धारण करता हुआ, पापसे भयभीत और तप तथा समाधिका अनुरागी जो मुमुक्षु पहले ही जीवनपर्यन्तके लिए उन चारोंका ही त्याग कर चुका है, वह शरीरको कृश करनेके लिए रसपरित्यागका विशेष रूपसे अभ्यास करे. क्योंकि जिस विषका प्रभाव मन्द हो गया है उस विषकी तरह थोड़ा भी विकारके कारणको अपनानेसे कल्याण नहीं होता ॥२८-२९॥

अथ विविक्तशय्यासनस्य तपसो लक्षणं फलं चोपदिशति—

विजन्तुविहितबलाद्यविषये मनोविक्रिया
निमित्तरहिते रतिं ददति शून्यसद्मादिके ।
स्मृतं शयनमासनाद्यथ विविक्तशय्यासनं
तपोऽर्तिहतिवर्णिताश्रुतसमाधिसंसिद्धये ॥३०॥

विहितं—उद्गमादिदोषरहितम् । ते च पिण्डशुद्धयुक्ता यथास्वमत्र चिन्त्याः । अबलाद्यविषयः—स्त्रीपशु-नपुंसक-गृहस्थ-क्षुद्रजीवानामगोचरं । मनोविक्रियानिमित्तानि—अशुभसंकल्पकरा. शब्दादयो. । रतिं—मनसोऽन्यत्र गमनौत्सुक्यनिवृत्तिम् । सद्मादि—गृहगुहा-वृक्षमूलादि । आसनादि—उपवेशनोद्भाव-स्थानादि । अर्तिहतिः—आबाधात्यय । वर्णिता—ब्रह्मचर्यम् ॥३०॥

अथ विविक्तवसतिमध्युषितस्य साधोरसाधुलोकसंसर्गादिप्रभवदोषसंक्लेशाभाव भावयति—

असभ्यजनसंवासदर्शनोत्थैर्न मथ्यते ।
मोहानुरागविद्वेषैर्विविक्तवसतिं श्रितः ॥३१॥

विविक्तवसतिम् । तल्लक्षण यथा—

'यत्र न चेतोविकृति शब्दाद्येषु प्रजायतेऽर्थेषु ।
स्वाध्यायध्यानहतिर्न यत्र वसतिर्विविक्ता सा ॥'

अपि च—

"हिंसाकषायशब्दादिवारकं ध्यानभावनापथ्यम् ।
निर्वेदहेतुबहुलं शयनासनमिष्यते यतिभि. ॥"

तन्निवासगुणश्च—

'कलहो रोल झञ्झा व्यामोह. संकरो ममत्वं च ।
ध्यानाध्ययनविघातो नास्ति विविक्ते मुनेर्वसत. ॥' [भ. आ., २३२ का रूपान्तर]

रोलः—शब्दबहुलता । झञ्झा—संक्लेशः । संकर.—असयतै सह मिश्रणम् । ध्यानं—एकस्मिन् प्रमेये निरुद्धा ज्ञानसंतति । अध्ययनं—अनेकप्रमेयसंचारी स्वाध्याय ॥३१॥

आगे विविक्तशय्यासन नामक तपका लक्षण और फल कहते हैं—

अनेक प्रकारकी बाधाओंको दूर करनेके लिए तथा ब्रह्मचर्य, शास्त्रचिन्ता और समाधिकी सम्यक् सिद्धिके लिए, ऐसे शून्य घर, गुफा आदिमे, जो जन्तुओंसे रहित प्रासुक हों, उद्गम आदि दोषोंसे रहित हो, स्त्री, पशु, नपुंसक, गृहस्थ और क्षुद्र जीवोंका जहाँ प्रवेश न हो, जहाँ मनमें विकार उत्पन्न करनेके निमित्त न हों, तथा जो मनको अन्यत्र जाने-से रोकता हो, ऐसे स्थानमे शयन करना, बैठना या खडा होना आदिको विविक्तशय्यासन तप कहा है ॥३०॥

आगे कहते हैं कि एकान्त स्थानमे रहनेवाले साधुके असाधु लोगोंके संसर्गसे होनेवाले दोष और संक्लेश नहीं होते—

एकान्त स्थानमे वास करनेवाला साधु असभ्य जनोंके सहवास और दर्शनसे उत्पन्न होनेवाले मोह, राग और द्वेषसे पीड़ित नहीं होता ॥३१॥

विशेषार्थ—विविक्तवसतिका लक्षण इस प्रकार कहा है—'जिस स्थानमें शब्द आदि विषयोंसे चित्तमे विकार पैदा नहीं होता, अर्थात् जहां विकारके साधन नहीं हैं और जहाँ स्वाध्याय और ध्यानमे बाधा नहीं आती वह विविक्तवसति है।' ऐसे स्थानके गुण इस प्रकार

अथ कायक्लेश तपो लक्षयित्वा तत्प्रतिनियुङ्क्ते—

ऊर्ध्वार्काद्ययनैः शवादिशयनैर्वीरासनाद्यासनैः
स्थानैरेकपदाग्रगामिभिरनिष्ठीवाग्रिमावग्रहैः । ३
योगैश्चातपनादिभिः प्रशमिना संतापनं यत्तनोः
कायक्लेशमिदं तपोऽर्त्युपनतौ सद्ध्यानसिद्ध्यै भजेत् ॥३२॥

ऊर्ध्वार्काद्ययनै'—शिरोगतादित्यादि—ग्रामान्तरगमनप्रत्यागमनैः। शवादिशयनै —मृतकदण्डलगडेक- ६
पार्श्वादिशय्याभि.। वीरासनाद्यासनैः—वीरासनमकरमुखासनोत्कुटिकासनादिभिः। स्थानै.—कायोत्सर्गे। एकपदाग्रगामिभि'—एकपदमग्रगामि पुरस्सरं येषा समपादप्रसारितभुजादीना तानि तैः। अनिष्ठीवाग्रिमावग्रहै.—अनिष्ठीवो निष्ठीवनाकरणमग्रिमो मुख्यो येषामकण्डूयनादीना तेऽनिष्ठीवाग्रिमास्ते च तेऽवग्रहाश्च ९
धर्मोपकारहेतवोऽभिप्रायास्तै। आतापनादिभिः—आतपनमातापनं ग्रीष्मे गिरिशिखरेऽभिसूर्यमवस्थानम्। एव वर्षासु रुक्षमूलेषु शीतकाले चतुष्पथे संतापनम्। कायक्लेशं—कायक्लेशाख्यम्। उक्तं च—

'ठाणसयणासणेहिं य विविहेहिं य उग्गहेहिं बहुगेहिं । १२
अणुवीचीपरिताओ कायकिलेसो हवदि एसो ॥' [मूलाचार, गा. ३५६]

अपि च—

'अनुसूर्यं प्रतिसूर्यं तिर्यक्सूर्यं तथोद्ध्वं सूर्यं च । १५
उद्भ्रमकेनापि गतं प्रत्यागमनं पुनर्गत्वा ॥
साधारं सविचारं ससन्निरोधं तथा विसृष्टाङ्गम् ।
समपादमेकपादं गृद्ध्रस्थित्यायते. स्थानम् ॥ १८

हैं—ऐसे एकान्त स्थानमें रहनेसे साधुको कलह, हल्ला-गुल्ला, संक्लेश, व्यामोह, असंयमी जनोंके साथ मिलना-जुलना, ममत्वका सामना नहीं करना पड़ता और न ध्यान और स्वाध्यायमें बाधा आती है ॥३१॥

आगे कायक्लेशका लक्षण कहकर उसके करनेकी प्रेरणा करते हैं—

सूर्यके सिरपर या मुँहके सामने आदि रहते हुए अन्य ग्रामको जाना और वहाँसे लौटना, मृतकके समान या दण्डके समान आदि रूपमें शयन करना, वीरासन आदि आसन लगाना, एक पैर आगे करके या दोनों पैरोंको बराबर करके खड़े रहना, न थूकना, न खुजाना आदि, धर्मोपकारक अवग्रह पालना, आतापन आदि योग करना इत्यादिके द्वारा तपस्वी साधु जो शरीरको कष्ट देता है उसे कायक्लेश तप कहते हैं। यह कायक्लेश दुःख आ पड़नेपर समीचीन ध्यानकी सिद्धिके लिए करना चाहिए ॥३२॥

विशेषार्थ—अयन, शयन, आसन, स्थान, अवग्रह और योगके द्वारा शरीरको कष्ट देनेका नाम कायक्लेश तप है। इनके प्रभेदोंका स्वरूप इस प्रकार कहा है—सूर्यकी ओर पीठ करके गमन करना, सूर्यको सम्मुख करके गमन करना, सूर्यको बायीं ओर या दाहिनी ओर करके गमन करना, सूर्यके सिरके ऊपर होते हुए गमन करना, सूर्यको पार्श्वमें करके गमन करना, भिक्षाके लिए एक गाँवसे दूसरे गाँव जाना और फिर लौटना, ये सब अयन अर्थात् गमनके प्रकार हैं जिनसे कायको कष्ट दिया जा सकता है। स्तम्भ आदिका सहारा लेकर खड़े होना, एक देशसे दूसरे देशमें जाकर खड़े होना, निश्चल खड़े होना, कायोत्सर्ग सहित खड़े होना, दोनों पैर बराबर रखकर खड़े होना, एक पैरसे

१. साधार स—भ. कु. च.।

समपर्यङ्कनिषद्योऽसमयुतगोदोहिकास्तथोत्कुटिका ।
मकरमुखहस्तिहस्तौ गोशय्या चार्धपर्यङ्कः ॥
३　वीरासनदण्डाद्या यतोर्ध्वशय्या च लगडशय्या च ।
उत्तानमवाक्शयनं शवशय्या चैकपार्श्वशय्या च ॥
अभ्रावकाशशय्या निष्ठीवनवर्जनं न कण्डूया ।
६　तृणफलकशिलेलास्वोपसेवनं केशलोच वा ॥
स्वापवियोगो रात्रावस्नानमदन्तघर्षणं चैव ।
कायक्लेशतपोद. शीतोष्णातापनाप्रभृति ॥' [भ. आ , गा २२२-२२७ का रूपान्तर]

९　साधारण (साधार) सावष्टम्भम् , स्तम्भादिकमाश्रित्येत्यर्थ । सविचार ससंक्रमम् । देशा (–देशान्तरं गत्वा)। ससन्निरोध निश्चलम् । विसृष्टाङ्ग सकायोत्सर्गम् । गृद्ध्रस्थितया गृद्ध्रस्योर्ध्वगमनमिव बाहू प्रसार्य इत्यर्थ । समयुत स्फिक्पिण्डसमकरणेनासनम् । गोदूहिका गोदोहने आसनमिवासनम् । उत्कुटिका उद्ध्वं संकुचितमासनम् ।
१२　मकरमुख—मकरस्य मुखमिव पादौ कृत्वासनम् । हस्तिहस्त हस्तिहस्तप्रसारणमिवैक पाद प्रसार्यासनम् । हस्तं प्रसार्य इत्यपरे । गोशय्या गवामासनमिव । वीरासन जङ्घे विप्रकृष्टदेशे कृत्वासनम् । लगडशय्या—संकुचितगात्रस्य शयनम् । अवाक् नीचमस्तकम् । अभ्रावकाशशय्या—बहिर्निरावरणदेशे शयनम् ॥३२॥

१५　अथैव षड्विध बहिरङ्ग तपो व्याख्याय तत्तावदेवाभ्यन्तर व्याकर्तुमिदमाह—

खड़े होना, जिस तरह गृद्ध ऊपरको जाता है उस तरह दोनो हाथ फैलाकर खड़े होना, ये स्थानके प्रकार हैं। उत्तम पर्यंकासनसे बैठना, कटिप्रदेशको सीधा रखकर बैठना, गोदूहिका (गो दूहते समय जैसा आसन होता है वैसा आसन), उत्कुटिकासन (दोनों पैरोंको मिलाकर भूमिको स्पर्श न करते हुए बैठना), मकरमुखासन (मगरके मुखकी तरह पैरोंको करके बैठना), हस्तिहस्तासन (हाथीकी सूँडके फैलावकी तरह एक पैरको फैलाकर बैठना, किन्हींके मतसे हाथको फैलाकर बैठना), गवासन, अर्धपर्यंकासन, वीरासन, (दोनों जंघाओंको दूर रखकर बैठना), दण्डासन ये सब आसनके प्रकार हैं। ऊर्ध्वशय्या, लगडशय्या (शरीरको संकुचित करके सोना), उत्तान शयन, अवाक्शयन (नीचा मुख करके सोना), शवशय्या (मुर्दे की तरह सोना), एक करवटसे सोना, बाहर खुले स्थानमें सोना, ये शयनके प्रकार हैं। थूकना नहीं, खुजाना नहीं, तृण, लकड़ी, पत्थर और भूमिपर सोना, केशलोंच, रात्रिमें सोना ही नहीं, स्नान न करना, दन्तघर्षण न करना ये सब अवग्रहके प्रकार हैं। आतापन योग अर्थात् गर्मीमें पर्वतके शिखरपर सूर्यके सामने खड़े होकर ध्यान करना, इसी तरह वर्षाऋतुमें वृक्षके नीचे, शीतकालमें चौराहेपर ध्यान लगाना ये योगके प्रकार हैं। इनके करनेसे साधुको कष्टसहनका अभ्यास रहता है। उस अभ्यासके कारण यदि कभी कष्ट आ पड़ता है तो साधु ध्यानसे विचलित नहीं होता। यदि कष्टसहनका अभ्यास न हो तो ऐसे समय में साधु विचलित हो जाता है। इसीलिए कहा है—'सुखपूर्वक भावित ज्ञान दुःख आनेपर नष्ट हो जाता है। इसलिए मुनिको शक्तिके अनुसार कष्टपूर्वक आत्माकी भावना—आराधना करना चाहिए' ॥३२॥

इस प्रकार छह प्रकारके बहिरंग तपका व्याख्यान करके अब छह ही प्रकारके अन्तरंग तपका कथन करते हैं—

---

१. स्वावशे भ. कु च ।

बाह्यद्रव्यानपेक्षत्वात् स्वसंवेद्यत्वतः परैः ।
अनध्यासात्तपः प्रायश्चित्ताद्यभ्यन्तरं भवेत् ॥३३॥

बाह्यद्रव्यानपेक्षत्वात्—अन्त करणव्यापारप्रधानत्वात् । परैः—तैथिकान्तरैः ॥३३॥ ३

अथ प्रायश्चित्त लक्षयितुमाह—

यत्कृत्याकरणे वर्ज्याऽवर्जने च रजोऽर्जितम् ।
सोऽतिचारोऽत्र तच्छुद्धिः प्रायश्चित्तं दशात्म तत् ॥३४॥ ६

वर्ज्याविर्जने—वर्ज्यस्याकर्तव्यस्य हिंसादेरवर्जनेऽत्यागे आवर्जने वा अनुष्ठाने । तच्छुद्धिः—तस्य शुद्धि. । शुद्धयत्यनयेति शोधनम् । तस्य वा शुद्धिरनेनेति तच्छुद्धीति ग्राह्यम् । उक्त च—

'पायच्छित्तं ति तओ जेण विसुज्झदि हु पुव्वकयपावं । ९
पायच्छित्तं पत्तोत्ति तेण वुत्त दसविह तु ॥' [मूलाचार, गा. ३६१]

'पायच्छित्तं पत्तोत्ति' प्रायश्चित्तमपराध प्राप्त. सन् । परे त्वेवमाहु —

'अकुर्वन् विहितं कर्म निन्दितं च समाचरन् । १२
प्रसजंश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ॥' [ ] ॥३४॥

अथ किमर्थं प्रायश्चित्तमनुष्ठीयत इति पृष्ठो श्लोकद्वयमाह—

प्रमाददोषविच्छेदममर्यादाविवर्जनम् । १५
भावप्रसादं निः(नै)शल्यमनवस्थाव्यपोहनम् ॥३५॥
चतुर्द्धाराधनं दार्ढ्यं संयमस्यैवमादिकम् ।
सिसाधयिषताऽऽचर्यं प्रायश्चित्तं विपश्चिता ॥३६॥ १८

प्रायश्चित्त आदि अन्तरंग तप हैं क्योंकि इनमें बाह्य द्रव्यकी अपेक्षा न होकर अन्तः-करणका व्यापार मुख्य है । दूसरे, ये आत्माके द्वारा ही जाने जाते हैं, दूसरोंको इनका पता नहीं चलता । तीसरे, अन्य धर्मोंमें इनका चलन नहीं है ॥३३॥

प्रायश्चित्त तपका लक्षण कहते हैं—

अवश्यकरणीय आवश्यक आदिके न करनेपर तथा त्यागने योग्य हिंसा आदिको न त्यागनेपर जो पाप लगता है उसे अतिचार कहते हैं । उस अतिचारकी शुद्धिको यहाँ प्राय-श्चित्त कहते हैं । उसके दस भेद है ।

विशेषार्थ—कहा है—'जिसके द्वारा पूर्वकृत पापोंका शोधन होता है उसे प्रायश्चित्त नामक तप कहते हैं । उसके दस भेद है ।

प्रायश्चित्त का विधान अन्य धर्मोंमें भी पाया जाता है । कहा है—'जो मनुष्य शास्त्र-विहित कर्मको नहीं करता या निन्दित कर्म करता है और इन्द्रियोंके विषयोंमें आसक्त रहता है वह प्रायश्चित्तके योग्य है—उसे प्रायश्चित्त करना चाहिए' ॥३४॥

प्रायश्चित्त क्यों किया जाता है, यह दो श्लोकोंसे बतलाते हैं—

चारित्रमें असावधानतासे लगे दोषोंको दूर करना, अमर्यादाका अर्थात् प्रतिज्ञात व्रतके उल्लंघनका त्याग यानी व्रतकी मर्यादाका पालन, परिणामोंकी निर्मलता, निःशल्यपना, उत्तरोत्तर अपराध करनेकी प्रवृत्तिको रोकना, सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र और सम्यक्तप इन चारोंका उद्योतन आदि, तथा संयमकी दृढता, इसी प्रकारके अन्य भी कार्यों-को साधनेकी इच्छा करनेवाले दोषज्ञ साधुको प्रायश्चित्त तप करना चाहिए ॥३५-३६॥

अमर्यादा—प्रतिज्ञातलक्षण ([1]प्रतिज्ञातव्रतलङ्घनम्) । उक्तं च—

'महातपस्तडागस्य संभृतस्य गुणाम्भसा ।

३ मर्यादापालिबन्धेऽल्पा[2]मप्युपेक्षिष्ठ मा क्षतिम् ॥' [ ]

अनवस्था—उपर्युपर्यपराधकरणम् ॥३५-३६॥

अथ प्रायश्चित्तशब्दस्य निर्वचनार्थमाह—

६ **प्रायो लोकस्तस्य चित्तं मनस्तच्छुद्धिकृत्क्रिया ।**
प्राये तपसि वा चित्तं निश्चयस्तन्निरुच्यते ॥३७॥

यथाह—

९ 'प्राय इत्युच्यते लोकस्तस्य चित्तं मनो भवेत् ।
एतच्छुद्धिकरं कर्म प्रायश्चित्त प्रचक्षते ॥'

यथा वा—

१२ 'प्रायो नाम तप. प्रोक्त चित्तं निश्चयसयुतम् ।
तपो निश्चयसंयोगात् प्रायश्चित्तं निगद्यते ॥' [ ] ॥३७॥

विशेषार्थ—प्रमादसे चारित्रमें लगे दोषोंका यदि प्रायश्चित्त द्वारा शोधन न किया जाये तो फिर दोषोंकी बाढ़ रुक नहीं सकती। एक बार मर्यादा टूटनेसे यदि रोका न गया तो वह मर्यादा फिर रह नहीं सकती। इसलिए प्रायश्चित्त अत्यन्त आवश्यक है। कहा भी है—'यह महातप रूपी तालाब गुणरूपी जलसे भरा है। इसकी मर्यादारूपी तटबन्दीमें थोड़ी सी भी क्षति की उपेक्षा नहीं करना चाहिए। थोड़ी-सी भी उपेक्षा करनेसे जैसे तालाबका पानी बाहर निकलकर बाढ ला देता है वैसे ही उपेक्षा करनेसे महातपमें भी दोषोंकी बाढ आनेका भय है' ॥३५-३६॥

प्रायश्चित शब्दकी निरुक्ति करते हैं—

प्रायश्चित्त शब्द दो शब्दों के मेल से बना है। उसमें 'प्राय' का अर्थ है लोक और चित्तका अर्थ है मन। यहाँ लोकसे अपने वर्गके लोग लेना चाहिए। अर्थात् अपने साधर्मी वर्गके मनको प्रसन्न करनेवाला जो काम है वह प्रायश्चित्त है। 'प्राय.' शब्द का अर्थ तप भी है और चित्तका अर्थ निश्चय। अर्थात् यथायोग्य उपवास आदि तपमें जो यह श्रद्धान है कि यह करणीय है उसे प्रायश्चित्त कहते हैं। यह प्रायश्चित्तका निरुक्तिगत अर्थ है ॥३७॥

विशेषार्थ—पूर्वशास्त्रोंमें प्रायश्चित्त शब्दकी दो निरुक्तियाँ पायी जाती हैं, उन दोनोंका संग्रह ग्रन्थकारने कर दिया है। आचार्य पूज्यपादने अपनी सर्वार्थसिद्धिमें प्रायश्चित्त की कोई निरुक्ति नहीं दी। उमास्वाति के तत्त्वार्थ भाष्य में 'अपराधो वा प्रायस्तेन विशुद्ध्यति' आता है। अकलंकदेवने दो प्रकारसे व्युत्पत्ति दी है—'प्राय. साधुलोकः। प्रायस्य यस्मिन् कर्मणि चित्तं प्रायश्चित्तम्। अपराधो वा प्रायः, चित्तं शुद्धि., प्रायस्य चित्तं प्रायश्चित्तं—अपराधविशुद्धिरित्यर्थ ।—(त. वा ९।२०।१)' इसमें प्रायश्चित्तके दो अर्थ किये हैं—प्राय. अर्थात् साधुजन, उसका चित्त जिस काममें हो उसे प्रायश्चित्त कहते हैं। और प्राय. अर्थात् अपराधको शुद्धि जिसके द्वारा हो उसे प्रायश्चित्त कहते हैं। यथार्थमें प्रायश्चित्तका यही अभिप्राय

---

१ भ कु च ।

२. -ल्पामप्युपेक्षिष्ट भ कु च. ।

अथ प्रायश्चित्तस्यालोचन-प्रतिक्रमण-तदुभय-विवेक-व्युत्सर्ग-तपश्छेदमूल-परिहार-श्रद्धानलक्षणेषु दशसु भेदेषु मध्ये प्रथममालोचनाख्यं तद्भेदं निर्दिशति—

सालोचनाद्यस्तद्भेदः प्रश्रयाद्धर्मसूरये । ३
यद्दशाकम्पिताद्यूनं स्वप्रमादनिवेदनम् ॥३८॥

प्रश्रयात्—विनयात् । उक्तं च—

'मस्तकविन्यस्तकरः कृतिकर्म विधाय शुद्धचेतस्कः । ६
आलोचयति सुविहितः सर्वान् दोषांस्त्यजन् रहसि ॥' [ ] ॥३८॥

अथालोचनाया देशकालविधाननिर्णयार्थमाह—

प्राह्णेऽपराह्णे सद्देशे बालवत् साधुनाऽखिलम् । ९
स्वागस्त्रिराजवाद्वाच्यं सूरेः शोध्यं च तेन तत् ॥३९॥

सद्देशे—प्रशस्तस्थाने । यथाह—

'अर्हत्सिद्धसमुद्राब्जसरःक्षीरफलाकुलम् । १२
तोरणोद्यानसद्माहियक्षवेश्मबृहद्गृहम् ॥
सुप्रशस्तं भवेत्स्थानमन्यदप्येवमादिकम् ।
सूरिरालोचनां तत्र प्रतिच्छत्यस्य शुद्धये ॥' [ ] १५

लिया जाता है । पूज्यपादने यही अर्थ किया है । उत्तरकालमें प्रायश्चित्तकी जो व्युत्पत्ति प्रचलित हुई उसमें यह अर्थ लिया गया है जैसा कि ग्रन्थके उक्त श्लोकसे स्पष्ट है । टीकामें ग्रन्थकारने दो व्युत्पत्तियाँ उद्धृत की है 'प्रायः लोकको कहते है उसका चित्त मन होता है । मनको शुद्ध करनेवाले कर्मको प्रायश्चित्त कहते है । इसमें अकलंकदेवकी दोनों व्युत्पत्तियोंका आशय आ जाता है ।' 'प्रायः तपको कहते है और चित्तका अर्थ है निश्चय अर्थात् तप करना चाहिए ऐसा श्रद्धान । निश्चयके संयोगसे तपको प्रायश्चित्त कहते हैं ।' ॥३७॥

प्रायश्चित्तके दस भेद हैं—आलोचन, प्रतिक्रमण, तदुभय, विवेक, व्युत्सर्ग, तपच्छेद, मूल, परिहार और श्रद्धान । उनमें-से प्रथम आलोचन भेदको कहते हैं—

धर्माचार्यके सम्मुख विनयसे जो आकम्पित आदि दस दोषोंसे रहित, अपने प्रमादका निवेदन किया जाता है वह प्रायश्चित्तका आलोचना नामक प्रथम भेद है ॥३८॥

विशेषार्थ—आलोचनाके सम्बन्धमें कहा है—दोनों हाथ मस्तकसे लगाकर, कृतिकर्मको करके, शुद्धचित्त होकर सुविहित साधु समस्त दोषोंको त्यागकर एकान्तमे आलोचना करता है । एकान्तके सम्बन्धमे इतना विशेष वक्तव्य है कि पुरुष तो अपनी आलोचना एकान्तमें करता है उसमें गुरु और आलोचक दो ही रहते हैं । किन्तु स्त्रीको प्रकाशमे आलोचना करना चाहिए तथा गुरु और आलोचक स्त्रीके सिवाय तीसरा व्यक्ति भी होना ही चाहिए ॥३८॥

आगे आलोचनाके देश और कालके विधानका निर्णय करते हैं—

पूर्वाह्ण या अपराह्णके समय प्रशस्त स्थानमे धर्माचार्यके आगे बालककी तरह सरलतासे तीन बार स्मरण करके अपना समस्त अपराध या पाप साधुको कहना चाहिए ॥३९॥

---

१. प्रमाददोषपरिहारः प्रायश्चित्तम् ।—सर्वार्थ ९।२० ।

सद्देश इत्युपलक्षणात् सुलग्नेऽपि । तदुक्तम्—

'आलोयणादिआ पुण होदि पसत्थे वि शुद्धभावस्स ।
३ पुव्वण्हे अवरण्हे सोमतिहिरक्खवेलाए ॥' [भ. आरा., गा. ५५४]

बालवत् । उक्तं च—

'जह बालो जपंतो कज्जमकज्जं च उज्जुय भणदि ।
६ तह आलोचेदव्व माया मोसं च मुत्तूण ॥' [मूलाचार, गा. ५६]

त्रि —त्रीन् वारान् । स्मृत्वेत्यध्याहारः । उक्तं च—

'इय उजुभावमुवगदो सव्वे दोसे सरित्तु तिक्खुत्तो ।
९ लेस्साहि विसुज्झंतो उवेदि सल्लं समुद्धरिदुं ॥' [भग. आरा, गा. ५५३]

शोध्य—सुनिरूपितप्रायश्चित्तदानेन निराकार्यम् ॥३९॥

अथैकादशविराधितमार्गेणाकम्पितादिदशदोषवर्जां पदविभागिकामालोचनां कृत्वा तपोऽनुष्ठेयमस्मर्य-
१२ माणबहुदोषेण छिन्नव्रतेन वा पुनरौघीमिति श्लोकपञ्चकेनाचष्टे—

आकम्पितं गुरुच्छेदभयादावर्जनं गुरोः ।
तपःशूरस्तवात्तत्र स्वाशक्त्याख्यानुमापितम् ॥४०॥
१५ यद् दृष्टं दूषणस्यान्यदृष्टस्यैव प्रथा गुरोः ।
बादरं बादरस्यैव सूक्ष्मं सूक्ष्मस्य केवलम् ॥४१॥
छन्नं कीदृक्चिकित्से दृग्दोषे पृष्ट्वेति तद्विधिः ।
१८ शब्दाकुलं गुरोः स्वागः शब्दनं शब्दसकुले ॥४२॥

विशेषार्थ—यहाँ आलोचना कब करना चाहिए और कहाँ करना चाहिए इसका निर्देश किया है। प्रातःकाल या दोपहरके पश्चात् प्रशस्त स्थानमे गुरुके सामने बालककी तरह सरल भावसे आलोचना करना चाहिए। जैसे बालक अच्छी और बुरी सब बातें सरल भावसे कहता है उसी तरह साधुको माया और झूठको छोडकर आलोचना करना चाहिए। इससे उसकी विशुद्धि होती है। भ आराधनामे (गा ५५४) ऐसा ही कहा है—'विशुद्ध परिणामवाले क्षपककी आलोचना आदि प्रशस्त क्षेत्रमे दिनके पूर्व भाग या उत्तर भागमे शुभ तिथि, शुभ नक्षत्र और शुभसमयमे होती है। अर्थात् आलोचनाके लिए परिणामोंकी विशुद्धिके साथ क्षेत्रशुद्धि और कालशुद्धि भी आवश्यक है ॥३९॥

जिस साधुने रत्नत्रयरूप मोक्षमार्गकी एकदेश विराधना की है उसे आकम्पित आदि दस दोषोंसे रहित पदविभागिकी नामक आलोचना करके तपस्या करना चाहिए। और जिसे अपने बहुत-से दोषोंका स्मरण नहीं है, अथवा जिसने अपने व्रतको भंग कर लिया है उसे औघी आलोचना करना चाहिए, यह बात पाँच श्लोकोंसे कहते हैं—

महाप्रायश्चित्तके भयसे उपकरणदान आदिसे गुरुको अल्पप्रायश्चित्त देनेके लिए अपने अनुकूल करना आकम्पित नामक आलोचना दोष है। वे धन्य हैं जो वीर पुरुषोंके करने योग्य उत्कृष्ट तपको करते हैं इस प्रकार तपस्वी वीरोंका गुणगान करके तपके विषयमें गुरुके सामने अपनी अशक्ति प्रकट करना, इस तरह प्रार्थना करनेपर गुरु थोडा प्रायश्चित्त देकर मुझपर कृपा करेंगे इसलिए अनुमानसे जानकर अपना अपराध प्रकट करना अनुमापित दोष है। दूसरेके द्वारा देख लिये गये दोषको ही प्रकट करना और जो अपना दोष दूसरेने नहीं देखा उसे छिपाना यद्दृष्ट नामक दोष है। गुरुके सामने स्थूल दोषको ही प्रकट करना और

दोषो बहुजनं सूरिदत्तान्यक्षुण्णतत्कृतिः ।
बालाच्छेदग्रहोऽव्यक्तं समात्तत्सेवितं त्वसौ ॥४३॥
दशेत्युज्झन् मलान्मूलाप्राप्तः पदविभागिकाम् ।
प्रकृत्यालोचनां मूलप्राप्तश्चौघीं तपश्चरेत् ॥४४॥ [पञ्चकम्]

गुरुच्छेदभयात्—महाप्रायश्चित्तशंकात. । आवर्जनं—उपकरणदानादिना आत्मनोऽल्पप्रायश्चित्त-दानार्थमनुकूलनम् ।

तप:शूरस्तवात्—धन्यास्ते ये वीरपुरुषाचरितमुत्कृष्टं तपः कुर्वन्तीति व्यावर्णनात् । तत्र—तपसि । स्वाशक्त्याख्या—आत्मनोऽसामर्थ्यप्रकाशनं गुरोरग्रे । अनुमापितं—गुरु प्रार्थित स्वल्पप्रायश्चित्तदानेन ममा (-ग्रह करीष्यतीत्यनुमानेन) । स्थूलस्यैव (बादरस्यैव)—स्थूलस्यैव दूषणस्य प्रकाशनं सूक्ष्मस्य तु आच्छादनमित्यर्थः ॥४१॥

छन्नमित्यादि—इदृशे दोषे सति कीदृशं प्रायश्चित्त क्रियत इति स्वदोषोद्देशेन गुरुं पृष्ट्वा तदुक्तं प्रायश्चित्तं कुर्वत. छन्न नामालोचनादोष. । शब्दसकुले—पक्षाद्यतीचारशुद्धिकालेषु बहुजनशब्दबहुले स्थाने ॥४२॥

सूरिरित्यादि—सूरिणा स्वगुरुणा दत्तं प्रथम वितीर्णं पश्चादन्यै. प्रायश्चित्तकुशलै. क्षुण्णं चर्चितं तत्प्रायश्चित्तम् । तस्य कृति. अनुष्ठानम् । बालात्—ज्ञानेन संयमेन वा हीनात् । समात्—आत्मसदृशात् पार्श्वस्थात् प्रायश्चित्तग्रहणम् । तत्सेवित—तेन समेन प्रायश्चित्तदायिना पार्श्वस्थेन सेव्यमानत्वात् । असौ आलोचनादोष ॥४३॥

पदविभागिका—विशेषालोचना, दीक्षाग्रहणात् प्रभृति यो यत्र यदा यथाऽपराध. कृतस्तस्य तत्र तदा तथा प्रकाशनात् । औघी—सामान्यालोचना । उक्त च—

ओघेन पदविभागेन द्वेधालोचना समुद्दिष्टा ।
मूलं प्राप्तस्यौघी पादविभागी ततोऽन्यस्य ॥

सूक्ष्म दोषको छिपाना बादर नामक दोष है। गुरुके आगे केवल सूक्ष्म दोषको ही प्रकट करना स्थूलको छिपाना सूक्ष्म नामक दोष है। ऐसा दोष होनेपर क्या प्रायश्चित्त होता है इस प्रकार अपने दोषके उद्देश्यसे गुरुको पूछकर उनके द्वारा कहा गया प्रायश्चित्त करनेसे छन्न नामक आलोचना दोष होता है क्योंकि उसने गुरुसे अपना दोष छिपाया। जब अन्य साधु पाक्षिक आदि दोषोंकी विशुद्धि करते हों और इस तरह बहुत हल्ला हो रहा हो उस समय गुरुके सामने अपने दोषोंका निवेदन करना शब्दाकुल नामक आलोचना दोष है। अपने गुरुके द्वारा दिये गये प्रायश्चित्तको अन्य प्रायश्चित्त कुशल साधुओंसे चर्चा करके स्वीकार करना बहुजन नामक आलोचना दोष है। अपनेसे जो ज्ञान और संयममें हीन है उससे प्रायश्चित्त लेना अव्यक्त नामक दोष है। अपने ही समान दोषी पार्श्वस्थ मुनिसे प्रायश्चित्त लेना तत्सेवित नामक दोष है। इस प्रकार इन दस दोषोंको त्यागकर आलोचना करना चाहिए। जिनसे मूलव्रतका सर्वोच्छेद नहीं हुआ है एकदेश छेद हुआ है उन्हें पदविभागिकी आलोचना करना चाहिए और जिनसे मूलका छेद हुआ है उन्हें औघी आलोचना करनी चाहिए ॥४०-४४॥

विशेषार्थ—आलोचनाके दो भेद कहे हैं—पदविभाग और ओघ। इनको स्पष्ट करते हुए अन्यत्र कहा है—'ओघ और पदविभागके भेदसे आलोचनाके दो भेद कहे हैं। जिसने व्रतका पूरा छेद किया है वह औघी अर्थात् सामान्य आलोचना करता है और जिसने

स्मरणपथमनुसरन्ती प्रायो नागासि मे विपुण्यस्य।
सर्वं छेद-समजनि ममेति वालोचयेदौघी ॥
प्रव्रज्यादिसमस्तं क्रमेण यद्यत्र येन भावेन।
सेवितमालोचयत पादविभागी तथा तत्तत् ॥

३

[भ आ. गा ५३३–३५ का रूपान्तर] ॥४४॥

६ अथालोचना विना महदपि तपो न संवरसहभाविनी निर्जरा करोति। कृतायामपि चालोचनाया विहितमनाचरन्न दोषविजयी स्यादतः सर्वदालोच्य गुरूक्तं च तदुचितमाचर्यमिति शिक्षणार्थमाह—

सामौषधवन्महदपि न तपोऽनालोचनं गुणाय भवेत्।
मन्त्रवदालोचनमपि कृत्वा नो विजयते विधिमकुर्वन् ॥४५॥

९

सामौषधवत्—सामे दोषे प्रयुक्तमौषध यथा। यथाहु —
'य. पिबत्यौषधं मोहात् सामे तीव्ररुजि ज्वरे।
प्रसुप्तं कृष्णसर्पं स कराग्रेण परामृशेत् ॥' [ ]

१२

गुणाय—उपकाराय। मन्त्रवत्—पञ्चाङ्गं गुप्तभाषण यथा।
विधि —विहिताचरणम् ॥४५॥

१५ अथ सद्गुरुदत्तप्रायश्चित्तोचितचित्तस्य दीप्त्यतिशयं दृष्टान्तेनाचष्टे—

यथादोषं यथाम्नायं दत्तं सद्गुरुणा वहन्।
रहस्यमन्तर्भात्युच्चैः शुद्धादर्श इवाननम् ॥४६॥

१८ रहस्यं—प्रायश्चित्तम् ॥४६॥

व्रतका एकदेश छेद किया है वह पदविभागी अर्थात् विशेष आलोचना करता है। मुझ पापीको प्राय. अपराधोंका स्मरण नहीं रहा। अतः मेरा समस्त व्रत छिन्न हो गया ऐसा मानकर औघी आलोचना करना चाहिए। समस्त प्रव्रज्या आदिमे क्रमसे जहाँ जिस भावसे दोष लगा है उसकी आलोचना करनेवालेके पदविभागी आलोचना होती है' ॥४०–४४॥

आलोचनाके विना महान् भी तप संवरके साथ होनेवाली-निर्जराको नहीं करता। और आलोचना करनेपर भी गुरु जो प्रायश्चित्त बतावें उसे न करनेवाला दोषोंसे मुक्त नहीं होता। इसलिए सर्वदा आलोचना करना चाहिए और गुरु जो कहें वह करना चाहिए, यह शिक्षा देते हैं—

जैसे विना विचारे सामदोषसे युक्त तीव्र ज्वरमे दी गयी महान् भी औषध आरोग्य-कारक नहीं होती, उसी प्रकार आलोचनाके विना एक पक्षका उपवास आदि महान् तप भी उपकारके लिए अर्थात् संवरके साथ होनेवाली निर्जराके लिए नहीं होता। तथा जैसे राजा मन्त्रियोंसे परामर्श करके भी उनके द्वारा दिये गये परामर्शको कार्यान्वित न करनेपर विजयी नहीं होता, उसी प्रकार आलोचना करके भी विहित आचरणको न करनेवाला साधु दोषोंपर विजय प्राप्त नहीं कर सकता ॥४५॥

जिसका चित्त सद्गुरुके द्वारा दिये गये प्रायश्चित्तमे रमता है उसको अतिशय चमक प्राप्त होती है यह बात दृष्टान्त द्वारा कहते हैं—

सद्गुरुके द्वारा दोषके अनुरूप और आगमके अनुसार दिये गये प्रायश्चित्तको अपनेमे धारण करनेवाला तपस्वी वैसे ही अत्यन्त चमकता है जैसे निर्मल दर्पणमे मुख चमकता है ॥४६॥

अथ प्रतिक्रमणलक्षणमाह—

मिथ्या मे दुष्कृतमिति प्रायोऽपायैर्निराकृतिः।
कृतस्य संवेगवता प्रतिक्रमणमागसः ॥४७॥ ३

उक्तं च—आस्थिताना योगाना धर्मकथादिव्याक्षेपहेतुसन्निधानेन विस्मरणे सति पुनरनुष्ठायकस्य संवेगनिर्वेदपरस्य गुरुविरहितस्याल्पापराधस्य पुनर्न करोमि मिथ्या मे दुष्कृतमित्येवमादिभिर्दोषान्निवर्तनं प्रतिक्रमणमिति ॥४७॥ ६

अथ तदुभयं लक्षयति—

[1]दुःस्वप्नादिकृतं दोषं निराकर्तुं क्रियेत यत्।
आलोचनप्रतिक्रान्तिद्वयं तदुभयं तु तत् ॥४८॥ ९

स्पष्टम्। किं च, आलोचनं प्रतिक्रमणपूर्वकं गुरुणाऽभ्यनुज्ञातं शिष्येणैव कर्तव्यं तदुभयं गुरुणैवानुष्ठेयम् ॥४८॥

इस प्रकार आलोचना तपका कथन हुआ।

अब प्रतिक्रमण को कहते हैं—

संसारसे भयभीत और भोगोंसे विरक्त साधुके द्वारा किये गये अपराधको 'मेरे दुष्कृत मिथ्या हो जायें, मेरे पाप शान्त हों' इस प्रकारके उपायोंके द्वारा दूर करनेको प्रतिक्रमण कहते हैं ॥४७॥

आचार्य अमितगतिने कहा है—समभागमें जंघासे जंघाका गाढ सम्बन्ध पद्मासन है। यह सुखकारक होनेसे सब लोगोंके द्वारा सरलतासे किया जा सकता है। समस्त दोनो जंघाओंको ऊपर-नीचे रखनेपर पर्यंकासन होता है। दोनों पैरोंको दोनो ऊरुपर रखनेपर वीरासन होता है। इसे वीर पुरुष ही चिरकाल तक कर सकते हैं, कायर नहीं कर सकते। आचार्य हेमचन्द्र (श्वे.) ने कहा है—दोनों जंघाओंके नीचेके भागको दोनो पैरोंके ऊपर रखनेपर तथा दोनों हाथोंको नाभिके पास ऊपरको करके बाये हाथपर दाहिना हाथ रखना पर्यंकासन है। जिसमें बायाँ पैर दक्षिण ऊरुके ऊपर और दाहिना पैर बाये ऊरुके ऊपर रखा जाता है उसे वीरासन कहते है। यह वीरोंके योग्य है। और जिसमे जंघाका दूसरी जंघाके साथ मध्य भागमें गाढ़ सम्बन्ध होता है, उसे पद्मासन कहते हैं।

पं. आशाधरजीने उक्त मतोंको अपनी टीकामें 'अन्य आचार्य ऐसा कहते हैं' ऐसा लिखकर उद्धृत किया है। और अपने लक्षणोंके समर्थनमे कुछ श्लोक उद्धृत किये हैं।

पं. आशाधरजीने इन्हीं तीनों लक्षणोंको एक श्लोकमें निबद्ध किया है। इनमे वीरासनके लक्षणमें तो मतभेद नहीं है। सभीने दोनों पैरोंको दोनों घुटनोंसे ऊपर जो ऊरु है उसपर रखकर बैठनेको वीरासन कहा है। शेष दोनों आसनोंके लक्षणोंमे मतभेद प्रतीत होता है। सोमदेवने पर्यंकासनको ही सुखासन कहा है ऐसा प्रतीत होता है। अमितगति पद्मासनको सुखसाध्य बतलाते है। उन्होंने उसका जो लक्षण किया है वह है भी सुखसाध्य। दोनों जंघाओंको मिलाकर बैठना सरल है। कठिनता तो पैरोंको जंघाओंके ऊपर रखनेमे होती है। हेमचन्द्र भी पद्मासनका यही लक्षण करते हैं। आजकल जो जिनमूर्तियाँ देखी जाती हैं उनके आसनको पर्यंकासन कहा जाता है। उनके दोनों चरण दोनो जंघाओंके ऊपर स्थित होते हैं। किन्तु यह आसन सुखासन नहीं है। दोनों जाँघोंको परस्परमें संश्लिष्ट करके बैठना

अथ वन्दनाया स्थानविशेषनिर्णयार्थमाह—

स्थीयते येन तत्स्थानं वन्दनायां द्विधा मतम् ।

३ **उद्भीभावो निषद्या च तत्प्रयोज्यं यथाबलम् ॥८४॥**

निषद्या—उपवेशनम् । उक्त च—

'स्थीयते येन तत्स्थानं द्विप्रकारमुदाहृतम् ।

६ वन्दना क्रियते यस्मादुद्भीभूयोपविश्य वा ॥' [ ] ॥८४॥

अथ कृतिकर्मयोग्य मुद्राचतुष्टय व्याचिख्यासुर्जिनमुद्रायोगमुद्रयोर्लक्षणमुन्मुद्रयति—

मुद्राश्चतस्रो व्युत्सर्गस्थितिर्जैनीह यौगिकी ।

९ **न्यस्तं पद्मासनाद्यङ्के पाण्योरुत्तानयोर्द्वयम् ॥८५॥**

व्युत्सर्गस्थितिर्जैनी । प्रलम्बितभुजेत्यादिना प्रागुक्ता जिनमुद्रा ।

उक्त च—

१२ 'जिनमुद्रान्तर कृत्वा पादयोश्चतुरङ्गुलम् ।

ऊर्ध्वजानोरवस्थान प्रलम्बितभुजद्वयम् ॥' [अमि. श्रा ८।५३]

यौगिकी—योगमुद्रा । उक्त च—

१५ 'जिना. पद्मासनादीनामङ्कमध्ये निवेशनम् ।

उत्तानकरयुग्मस्य योगमुद्रा बभाषिरे ॥' [अमि. श्रा. ८।५५] ॥८५॥

अथ वन्दनामुद्रा मुक्ताशुक्तिमुद्रा च निर्दिशति—

१८ **स्थितस्याध्युदरं न्यस्य कूर्परौ मुकुलीकृतौ ।**

करौ स्याद् वन्दनामुद्रा मुक्ताशुक्तिर्युताङ्गुली ॥८६॥

स्थितस्य—उद्भस्य । अध्युदर—उदरस्योपरि । युताङ्गुली । मुकुलीकृतौ करावेव संलग्नाङ्गुलिकौ

२१ स्थितस्य पूर्ववत् मुक्ताशुक्तिर्नाम मुद्रा । उक्तं च—

सरल होता है। या बायें पैरके ऊपर दायाँ पैर रखकर बैठना सुखासन है जैसा सोमदेवने कहा है ॥८३॥

आगे वन्दनाके स्थान-विशेषका निर्णय करते हैं—

वन्दना करनेवाला जिस रूपसे स्थिर रहता है उसे स्थान कहते हैं। वे स्थान दो माने गये हैं। एक खडे होना, दूसरा बैठना। वन्दना करनेवालेको उनमें-से अपनी शक्तिके अनुसार कोई एक स्थानका उपयोग करना चाहिए ॥८४॥

कृतिकर्मके योग्य चार मुद्राएँ होती हैं। उनमें-से जिनमुद्रा और योगमुद्राका लक्षण कहते हैं—

मुद्रा चार होती हैं। उनमें-से कायोत्सर्गसे खड़े होना जिनमुद्रा है। तथा पद्मासन या पर्यंकासन या वीरासनसे बैठकर गोदमे दोनों हथेलियोंको ऊपरकी ओर करके स्थापित करना योगमुद्रा है ॥८५॥

विशेषार्थ—कृतिकर्मके योग्य मुद्राओंमें-से यहाँ दो मुद्राओका स्वरूप कहा है। अमितगति आचार्यने भी कहा है—दोनों पैरोंके मध्यमे चार अगुलका अन्तर रखकर तथा दोनों हाथोंको नीचेकी ओर लटकाकर खड़े होना जिनमुद्रा है ॥८५॥

आगे वन्दनामुद्रा और मुक्ताशक्तिमुद्राका स्वरूप कहते हैं—

खड़े होकर दोनों कोहनियोंको पेटके ऊपर रखकर तथा दोनों हाथोंको मुकुलित करना

'मुकुलीकृतमाधाय जठरोपरि कूर्परम् ।
स्थितस्य वन्दनामुद्रा करद्वन्द्व निवेदितम् ॥' [अमि. श्रा. ८।५४]

तथा—

'मुक्ता शुक्तिर्मता मुद्रा जठरोपरि कूर्परम् ।
ऊर्ध्वजानो करद्वन्द्वं संलग्नागुलि सूरिभिः ॥' [अमि श्रा. ८।५६] ॥८६॥

अथ मुद्राणा यथाविषय प्रयोगनिर्णयार्थमाह—

स्वमुद्रा वन्दने मुक्ताशुक्तिः सामायिकस्तवे ।
योगमुद्रास्यया स्थित्या जिनमुद्रा तनूज्झने ॥८७॥

स्वमुद्रा—वन्दनामुद्रा प्रयोक्तव्येत्युपस्कार । सामायिकस्तवे—सामायिकं च णमो अरहंताणमित्यादि दण्डकः, स्तवश्च थोस्सामीत्यादि दण्डक. । (सामायिकं च स्तवश्च) सामायिकस्तवस्तस्मिन् । आस्यया—उपवेशनेन । तनूज्झने—क्रियमाणे । स्थित्या—उद्भीभावेन । ॥८७॥

अथावर्तस्वरूपनिरूपणार्थमाह— १

शुभयोगपरावर्तानावर्तान् द्वादशाहुराद्यन्ते ।
साम्यस्य हि स्तवस्य च मनोङ्गगीःसंयतं परावर्त्यम् ॥८८॥

शुभयोगपरावर्तान्—शुभा हिंसादिरहितत्वात् प्रशस्ता योगा मनोवाक्कायव्यापारास्तेषा परावर्ता पूर्वावस्थात्यागेनावस्थान्तरप्रापणानि । आद्यन्ते—आरम्भे समाप्तौ च । साम्यस्य—णमो अरहंताणमित्यादि सामायिकदण्डकस्य । स्तवस्य—थोस्सामीत्यादिदण्डकस्य । मनोङ्गगी—चित्तकायवाचम् । संयतं—निरुद्धपापव्यापारम् । मनोङ्गगीःसंयतमिति वा समस्तम् । तत्र मनोङ्गगिरा संयतं संयमनमिति विग्रह. । परावर्त्यं—अवस्थान्तरं नेतव्यं वन्दनोद्यतैरिति शेष । तद्यथा—सामायिकस्यादौ क्रियाविज्ञापने विकल्पत्यागेन तदुच्चारण प्रति मनस प्रणिधानं संयतमनःपरावर्तनमुच्यते । तथा भूमिस्पर्शलक्षणावनतिक्रियावन्दनामुद्रात्यागेन पुनरुत्थितस्य मुक्ताशुक्तिमुद्राङ्कितहस्तद्वयपरिभ्रमणत्रय सयतकायपरावर्तनमाख्यायते । १५ १८ २१

वन्दनामुद्रा है। तथा इसी स्थितिमें दोनों हाथोंकी अँगुलियोंको परस्परमें मिलाना मुक्ताशुक्तिमुद्रा है ॥८६॥

आगे इन चार मुद्राओंमें-से कब किस मुद्राका प्रयोग करना चाहिए, यह बताते हैं—

आवश्यक करनेवालेको वन्दना करते समय वन्दनामुद्राका प्रयोग करना चाहिए। 'णमो अरहंताण' इत्यादि सामायिक दण्डक तथा 'थोस्सामि' इत्यादि चतुर्विंशतिस्तवके समय मुक्ताशुक्तिमुद्राका प्रयोग करना चाहिए। इसी प्रकार बैठकर कायोत्सर्ग करते समय योगमुद्रा और खड़े होकर कायोत्सर्ग करते समय जिनमुद्राको धारण करना चाहिए ॥८७॥

विशेषार्थ—आवश्यक करते समय मुद्राका प्रयोग करना आवश्यक है। हिन्दू पुराणोंमें तो मुद्राके अनेक भेद कहे हैं और लिखा है कि जो दैविक कर्म विना मुद्राके किया जाता है वह निष्फल होता है (देखो—शब्दकल्पद्रुममें 'मुद्रा' शब्द) ॥८७॥

आगे आवर्तका स्वरूप कहते है—

शुभयोगके परावर्तनको आवर्त कहते हैं। वे आवर्त बारह होते है। क्योंकि वन्दना करनेवालोंको सामायिक और स्तवके आदि और अन्तमे मन, वचन और कायको पापाचारसे रोककर शुभ आचारमें लगाना चाहिए ॥८८॥

विशेषार्थ—मन, वचन और कायके व्यापारको योग कहते हैं। हिंसा आदिसे रहित होनेसे प्रशस्त योगको शुभयोग कहते हैं। उनके परावर्तको अर्थात् पूर्व अवस्थाको त्यागकर

'चैत्यभक्तिकायोत्सर्गं करोमि' इत्याद्युच्चारणविरामेण 'णमो अरहंताणं' इत्याद्युच्चारणकरणं संयतवाक्-परावर्तनमभिधीयते। एवं सामायिकदण्डकस्य तत्त्रयं कल्प्यम्। तथैव च स्तवदण्डकस्याद्यन्तयोः पृथक् तत्त्रयमवसेयम्। इति समुदितानि चत्वारि तत्त्रयाणि द्वादशावर्ता एकस्मिन् कायोत्सर्गे भवन्ति। एतच्च भगवद्वसुनन्दिसैद्धान्तदेवपादैराचारटीकाया 'दुओ णदं जहाजादं' इत्यादिसूत्रे व्याख्यातं द्रष्टव्यम्।

तथैव चान्वाख्यात क्रियाकाण्डेऽपि—

> 'द्वे नते साम्यनुत्यादौ भ्रमास्त्रिस्त्रिस्त्रियोगगा।
> त्रिस्त्रिर्भ्रमे प्रणामश्च साम्ये स्तवे मुखान्तयोः॥'

एतदेव चामितगतिरप्यन्वाख्यात्—

> 'कथिता द्वादशावर्ता वपुर्वचनचेतसाम्।
> स्तवसामायिकाद्यन्तपरावर्तनलक्षणा॥' [अमि. श्रा. ८।६५]

इद चात्राचारटीकाव्याख्यानमवधार्यम्—

'चतसृषु दिक्षु चत्वारः प्रणामा एकस्मिन् भ्रमणे। एवं त्रिषु भ्रमणेषु द्वादश भवन्तीति॥' [मूलाचार गा. ६०१ टीका] ॥८८॥

अथ वृद्धव्यवहारानुरोधार्थं हस्तपरावर्तनलक्षणान्नावर्तानुपदिशति—

अवस्थान्तर धारण करनेको आवर्त कहते हैं, वे बारह होते हैं। क्योंकि सामायिक और स्तवके आदि और अन्तमे किये जाते हैं। अतः २×३×२ = १२ होते हैं। अथवा मनोङ्गगी और संयतको समस्त करना चाहिए। उसका अर्थ होगा—मन, शरीर और वाणीका संयमना अर्थात् सामायिकके प्रारम्भ और समाप्तिमे मन, वचन, कायका संयमन करना चाहिए। स्तवके प्रारम्भ और समाप्तिमे मन, वचन, कायका सयमन करना चाहिए। उसका स्पष्टीकरण इस प्रकार है—सामायिक दण्डकके आदिमे विकल्पोंको त्यागकर उसके उच्चारणके प्रति मन लगाना संयतमनपरावर्तन है। तथा भूमिका स्पर्श करते हुए वन्दनामुद्रापूर्वक जो नमनक्रिया की जाती है उसे त्यागकर पुन खडा होकर दोनों हाथोंको मुक्ताशुक्तिमुद्रामें स्थापित करके तीन बार घुमानेको संयतकायपरावर्तन कहते हैं। 'चैत्यभक्तिकायोत्सर्ग करोमि' इत्यादि उच्चारण करके 'णमो अरहंताणं' इत्यादि उच्चारण करना सयतवाक् परावर्तन है। इस प्रकार सामायिक दण्डकके प्रारम्भमे शुभयोग परावर्तन रूप तीन आवर्त होते हैं। इसी प्रकार सामायिक दण्डकके अन्तमें भी यथायोग्य तीन आवर्त करना चाहिए। तथा इसी प्रकार चतुर्विंशतिस्तव दण्डकके आदि और अन्तमें भी तीन-तीन आवर्त करना चाहिए। इस प्रकार मिलकर ४×३ = १२ आवर्त एक कायोत्सर्गमे होते हैं। यह सब कथन आचार्य वसुनन्दि सैद्धान्तिकने मूलाचारकी गाथा 'दुओणदं जधा जादं' (७।१०४) की टीकामे लिखा है। संस्कृत क्रियाकाण्डमे भी ऐसा ही कहा है—अर्थात् सामायिक और चतुर्विंशतिस्तवके आदि और अन्तमे दो नमस्कार मन-वचन-काय सम्बन्धी तीन-तीन आवर्त और चारों दिशाओंमे-से प्रत्येक दिशामे तीन-तीन आवर्तके पीछे एक प्रणाम होता है। आचार्य अमितगतिने भी ऐसा ही कहा है—अर्थात् स्तव और सामायिकके आदि और अन्तमे मन-वचन-कायके परावर्तन रूप बारह आवर्त कहे हैं ॥८८॥

इस प्रकार आवर्तका अर्थ तीनों योगोंका परावर्तन होता है। किन्तु वृद्धजनोंके व्यवहारमे इसे हाथोंका परावर्तन भी कहते हैं। इसलिए यहाँ उसका भी कथन करते हैं—

त्रिः संपुटीकृतौ हस्तौ भ्रमयित्वा पठेत् पुनः ।
साम्यं पठित्वा भ्रमयेत्तौ स्तवेऽप्येनत्तदाचरेत् ॥८९॥

पठेत्—साम्यमुच्चारयेदिति संबन्ध. । भ्रमयेत्—पुनस्त्रीन् वारानावर्तयेदिति सबन्धः । उक्तं च चारित्रसारे—व्युत्सर्गतपोवर्णनप्रस्तावे—'क्रिया कुर्वाणो वीर्योपगूहनमकृत्वा शक्त्यनुरूपत. स्थितेन असक्त' सन् पर्यङ्कासनेन वा त्रिकरणशुद्धया सपुटीकृतकर' क्रियाविज्ञापनपूर्वक सामायिकदण्डकमुच्चारयन् तदावर्तत्रयं यथाजातशिरोनमनमेकं भवति । अनेन प्रकारेण सामायिकदण्डकसमासावपि प्रवर्त्य यथोक्तकालं जिनगुणानुस्मरणसहितं कायव्युत्सर्गं कृत्वा द्वितीयदण्डकस्यादावन्ते च तथैव प्रवर्तताम् । एवमेकस्य कायोत्सर्गस्य द्वादशावर्ताश्चत्वारि शिरोवनमनानि भवन्ति' इत्यादि ॥८९॥

अथ शिरोलक्षणमाह—

प्रत्यावर्तत्रयं भक्त्या नन्नमत् क्रियते शिरः ।
यत्पाणिकुड्मलाङ्कं तत् क्रियायां स्याच्चतुःशिरः ॥९०॥

नन्नमत्—भृश पुन. पुनर्वा नमत् । प्रणमदिति वा पाठ. । क्रियायां—चैत्यभक्त्यादिकायोत्सर्गविषये । चतु —चतुरो वारान् । सामायिकदण्डकस्य आदावन्ते च तथा स्तवदण्डकस्य चावर्तत्रयप्रयोगोत्तरकाल शिरोवनमनविधानात् । अथवा चतुर्णां शिरसा समाहारश्चतु. शिर इति व्याख्येयम् ॥९०॥

अथ चैत्यभक्त्यादिषु प्रकारान्तरेणाप्यावर्तशिरसा संभवोपदेशार्थमाह—

आवश्यक करनेवाले साधुको 'णमो अरहंताणं' इत्यादि सामायिकदण्डकका उच्चारण करनेसे पहले दोनों हाथोंको मुकुलित करके तीन बार घुमाना चाहिए। फिर सामायिक पाठ पढ़ना चाहिए। पढ़ चुकनेपर पुनः उसी तरह दोनों हाथोंको मुकुलित करके तीन बार घुमाना चाहिए। स्तवदण्डकके आदि और अन्तमें भी ऐसा ही करना चाहिए ॥८९॥

विशेषार्थ—चारित्रसारमें व्युत्सर्ग तपके वर्णनमें लिखा है—कृतिकर्म करते हुए अपनी शक्तिको न छिपाकर शक्तिके अनुसार खड़े होकर या अशक्त होनेपर पर्यंकासनसे बैठकर मन-वचन-कायको शुद्ध करके, दोनो हाथोंको मुकुलित करे। फिर क्रियाविज्ञापनपूर्वक सामायिक दण्डकका उच्चारण करते हुए तीन आवर्त और एक बार सिरका नमन करे। इसी प्रकार सामायिक दण्डककी समाप्ति होनेपर करे तथा यथोक्त काल तक जिनभगवान्‌के गुणोंका स्मरण करते हुए कायोत्सर्गको करके स्तवदण्डकके आदि और अन्तमें भी ऐसा ही करे। इस प्रकार एक कायोत्सर्गके बारह आवर्त और चार शिरोनति होती है। अथवा एक प्रदक्षिणा करनेपर प्रत्येक दिशामे तीन आवर्त और एक नमस्कार इस तरह चारों दिशाओंमें बारह आवर्त और चार शिरोनमन होते है। यदि इससे अधिक हो जाये तो कोई दोष नहीं है ॥८९॥

आगे शिरोनतिका स्वरूप कहते हैं—

चैत्यभक्ति आदि कायोत्सर्गके विषयमे तीन-तीन आवर्तके पश्चात् दोनों हाथोंको मुकुलित करके मस्तकसे लगानेपर जो चार बार भक्तिपूर्वक नमस्कार किया जाता है उसे शिरोनति कहते हैं। क्योंकि सामायिकदण्डकके आदि और अन्तमे तथा स्तवदण्डकके आदि और अन्तमे तीन आवर्तके पश्चात् सिरको नमन करनेका विधान है ॥९०॥

चैत्यभक्ति आदिमें आवर्त और शिरोनति दूसरी तरहसे भी होते हैं। उन्हींको आगे बतलाते हैं—

प्रतिभ्रामरि वार्चादिस्तुतौ दिश्येकशश्चरेत् ।
त्रीनावर्तान् शिरश्चैकं तदाधिक्यं न दुष्यति ॥९१॥

३ प्रतिभ्रामरि—एकैकस्मिन् प्रदक्षिणीकरणे । अर्चादिस्तुतौ—चैत्यादिभक्तौ । दिश्येकश:—एकैकस्या पूर्वादिदिशि । शिर:—करमुकुलाङ्कितशिर करणम् । उक्त च—

'चतुर्दिक्षु विहारस्य परावर्तास्त्रियोगगा ।
६ प्रतिभ्रामरि विज्ञेया आवर्ता द्वादशापि च ॥' [ ]

तदाधिक्य—आवर्तानां शिरसा चोक्तप्रमाणादधिकीकरण प्रदक्षिणात्रये तत्सभवात् । उक्त च चारित्रसारे—एकस्मिन् प्रदक्षिणीकरणे चैत्यादीनामभिमुखीभूतस्यावर्तत्रयैकावनमने कृते चतसृष्वपि दिक्षु द्वादशा-
९ वर्ताश्चतस्र शिरोवनतयो भवन्ति । आवर्तनाना शिर प्रणतीनामुक्तप्रमाणादाधिक्यमपि न दोषायेति ॥९१॥

अथोक्तस्यैव समर्थनार्थमाह—

'दीयते चैत्यनिर्वाणयोगिनन्दीश्वरेषु हि ।
१२ वन्द्यमानेष्वधीयानैस्तत्तद्भक्ति प्रदक्षिणा ॥९२॥

स्पष्टम् ॥९२॥

अथ स्वमतेन परमतेन च नतिनिर्णयार्थमाह—

अथवा चैत्यआदि भक्तिमें प्रत्येक प्रदक्षिणामें एक-एक दिशामे तीन आवर्त और दोनों हाथोंको मुकुलित करके मस्तकसे लगाना इस प्रकार एक शिर करना चाहिए । इस तरह करनेसे आवर्त और शिरोनतिका आधिक्य दोषकारक नहीं होता ॥९१॥

विशेषार्थ—ऊपर दो प्रकार बतलाये हैं । एक प्रकार है सामायिक और स्तवके आदि और अन्तमें तीन आवर्त और एक शिरोनति करना । इस तरहसे बारह आवर्त और चार शिरोनति होते हैं । दूसरा इस प्रकार है चारों दिशाओंमें-से प्रत्येक दिशामे प्रदक्षिणाके क्रमसे तीन आवर्त और एक शिरोनति । इस तरह एक प्रदक्षिणामे बारह आवर्त और चार शिरोनति होती हैं । किन्तु इस तरह तीन प्रदक्षिणा करनेपर आवर्तों और शिरोनतिकी संख्या बढ जाती है । किन्तु इसमें कोई दोष नहीं है । चारित्रसारमें ऐसा लिखा है जो हम पहले लिख आये हैं ॥९१॥

आगे इसीका समर्थन करते हैं—

क्योंकि चैत्यवन्दना, निर्वाणवन्दना, योगिवन्दना, और नन्दीश्वर वन्दना करते समय उन-उन भक्तियोंको पढते हुए साधुगण प्रदक्षिणा दिया करते हैं ॥९२॥

विशेषार्थ—चैत्यवन्दना करते समय चैत्यभक्ति, निर्वाणवन्दना करते समय निर्वाणभक्ति, योगिवन्दना करते समय योगिभक्ति और नन्दीश्वर वन्दना करते समय नन्दीश्वर भक्ति साधुगण पढते हैं । और पढते हुए प्रदक्षिणा करते हैं जिससे चारों दिशाओंमें स्थित चैत्य आदिकी वन्दना हो सके । अत प्रत्येक दिशामे तीन आवर्त और एक नमस्कार करते हैं । तीन प्रदक्षिणा करनेपर आवर्तों और नमस्कारकी संख्या तिगुनी हो जाती है जो दोष नहीं है ॥९२॥

आगे ग्रन्थकार अपने और दूसरे आचार्योंके मतसे शिरोनतिका निर्णय करते हैं—

द्वे साम्यस्य स्तुतेश्चादौ शरीरनमनान्नती ।
वन्दनाद्यन्तयोः कैश्चिन्निविश्य नमनान्मते ॥९३॥

शरीरनमनात्—पञ्चाङ्गप्रणमनात् भूमिस्पर्शादित्यर्थ.। कैश्चित्—स्वामिसमन्तभद्रादिभिः। मते द्वे नतो इष्टे। यथाहुस्तत्रभवन्तः श्रीमत्प्रभेन्दुदेवपादा रत्नकरण्डकटीकाया चतुरावर्तत्रितय इत्यादिसूत्रे 'द्विनिषद्य' इत्यस्य व्याख्याने देववन्दना कुर्वता हि प्रारम्भे समाप्तौ चोपविश्य प्रणाम. कर्तव्य इति ॥९३॥

सामायिक दण्डक और चतुर्विंशतिस्तवके आदिमें पंचांग नमस्कारपूर्वक दो नमस्कार करना चाहिए। किन्तु स्वामी समन्तभद्र आदिने वन्दनाके आदि और अन्तमें बैठकर नमस्कार करनेसे दो नति मानी हैं ॥९३॥

विशेषार्थ—मूलाचारमें कहा है—एक कृतिकर्ममें दो नति, यथाजात, बारह आवर्त, चार शिर और तीन शुद्धियाँ होती हैं। इन सबका स्पष्टीकरण पहले किया गया है। श्वेताम्बर आगममें भी दो नति, एक यथाजात, बारह आवर्त, चार शिर, तीन गुप्तिके अतिरिक्त दो प्रवेश और एक निष्क्रमण इस तरह सब २५ आवश्यक कृतिकर्ममें बतलाये हैं। यह गुरु-वन्दनाके क्रममें बतलाये गये हैं। षट्खण्डागमके वर्गणा खण्डमें भी क्रियाकर्मके नामसे आता है—'तमादाहीणं पदाहिणं तिक्खुत्तं तियोणदं चदुसिरं बारसावत्तं तं सव्वं किरियाकम्मं णाम"—पु. १३, पृ. ८८। धवलामें जो इसकी व्याख्या दी है उसका आवश्यक अनुवाद दिया जाता है—आत्माधीन होना, प्रदक्षिणा करना, तीन बार अवनति, चार शिर, बारह आवर्त ये सब क्रियाकर्म हैं।

आत्माधीन होना आदिके भेदसे क्रियाकर्म छह प्रकारका है। उनमें-से क्रियाकर्म करते समय आत्माधीन होना पराधीन न होना आत्माधीन है। वन्दना करते समय गुरु, जिन, जिनालयकी प्रदक्षिणा करके नमस्कार करना प्रदक्षिणा है। प्रदक्षिणा और नमस्कार आदिका तीन बार करना त्रिकृत्वा है। अथवा एक ही दिनमें जिन, गुरु और ऋषियोंकी वन्दना तीन बार की जाती है इसलिए त्रिकृत्वा कहा है। 'ओणद'का अर्थ अवनमन या भूमिमें बैठना है। यह तीन बार किया जाता है इसलिए तीन बार अवनमन कहा है। इसका स्पष्टीकरण इस प्रकार है—शुद्धमन होकर, पैर धोकर, और जिनेन्द्रके दर्शनसे उत्पन्न हुए हर्षसे पुलकित वदन होकर जो जिनदेवके आगे बैठना यह प्रथम अवनमन है। जो उठकर जिनेन्द्र आदि-की विनति करके बैठना यह दूसरा अवनमन है। फिर उठकर सामायिक दण्डकके द्वारा आत्मशुद्धिपूर्वक कषायसहित शरीरका त्याग करके, जिनेन्द्रदेवके अनन्त गुणोंका ध्यान करके, चौबीस तीर्थंकरोंकी वन्दना करके, फिर जिन-जिनालय और गुरुओंकी स्तुति करके भूमिमें बैठना यह तीसरा अवनमन है। इस प्रकार एक-एक क्रियाकर्ममें तीन ही अवनमन होते हैं। सब क्रियाकर्म चतुःशिर होता है। उसका स्पष्टीकरण इस प्रकार है—सामायिकके आदिमें जिनेन्द्रदेवको सिर नमाना एक सिर है। उसीके अन्तमें सिर नवाना दूसरा सिर है। त्थोस्सामिदण्डकके आदिमें सिर नवाना तीसरा सिर है। उसीके अन्तमें सिर नवाना

---

१ 'दुओ णद जहाजाद बारसावत्तमेव य।
चदुस्सिरं तिसुद्ध च किदियम्मं पउजदे ॥'—७।१०४।

२. 'दुओ णय जहाजाय किइकम्मं बारसावयं।
चउस्सिर तिगुत्त च दुपवेस एगनिक्खमणं ॥'—बृहत्कल्पसूत्र ३।४४७०।

अथ प्रणामभेदनिर्णयार्थं श्लोकद्वयमाह—

योगैः प्रणामस्त्रेधाऽर्हज्ज्ञानादेः कीर्तनात्त्रिभिः ।
कं करौ ककरं जानुकरं ककरजानु च ॥९४॥
नम्रमेकद्वित्रिचतुःपञ्चाङ्गः कायिकः क्रमात् ।
प्रणामः पञ्चधावाचि यथास्थानं क्रियते सः ॥९५॥

क—मस्तकम् । नम्रमेकाङ्ग इत्यादि । योश्च (?) ककर—कं च करौ चेति द्वन्द्वः ॥९४॥ स ।

उक्तं च—

मनसा वचसा तन्वा कुरुते कीर्तनं मुनिः ।
ज्ञानादीनां जिनेन्द्रस्य प्रणामस्त्रिविधो मतः ॥ [ ]
एकाङ्गो नमने मूर्ध्नो द्व्यङ्गः स्यात् करयोरपि ।
त्र्यङ्गः करशिरोनामे प्रणामः कथितो जिनैः ॥ [ ]

चौथा सिर है। इस प्रकार एक क्रियाकर्म चतुःशिर होता है। अथवा सभी क्रियाकर्म चतुःशिर अर्थात् चतुःप्रधान होता है क्योंकि अरहन्त, सिद्ध, साधु और धर्मको प्रधान करके सब क्रियाकर्मोंकी प्रवृत्ति देखी जाती है। सामायिक और त्थोस्सामि दण्डकके आदि और अन्तमें मन-वचन-कायकी विशुद्धि परावर्तनके बार बारह होते हैं। इसलिए एक क्रियाकर्मको बारह आवर्तवाला कहा है। इस सबका नाम क्रियाकर्म है। स्वामी समन्तभद्रने उक्त कथनों-को ही दृष्टिमें रखकर सामायिक प्रतिमाका स्वरूप कहा है—उसमें भी बारह आवर्त, चतुः-शिर, यथाजात, त्रिशुद्धपद तो समान है। धवलामें तिक्खुत्तोका एक अर्थ दिनमें तीन बार किया है। यहाँ भी 'त्रिसन्ध्यमभिवन्दी' कहा है। केवल 'द्विनिषद्यः' पद ऐसा है जो उक्त दोनों सूत्रोंमें नहीं है। रत्नकरण्डके टीकाकार प्रभाचन्द्रने उसका अर्थ किया है—दो निषद्या—उपवेशन है जिसमें, अर्थात् देववन्दना करनेवालेको प्रारम्भमें और अन्तमें बैठकर प्रणाम करना चाहिए। इसीका मतभेदके रूपमें उल्लेख ग्रन्थकार आशाधरजीने ऊपर किया है। षट्खण्डागमसूत्रमें भी इस दृष्टिसे भिन्न मत है। उसमें 'तियोणदं' अर्थात् तीनबार अवनमन कहा है। अवनमनका अर्थ है भूमिस्पर्श। निषद्याका भी अभिप्राय उसीसे है। इस तरह क्रियाकर्मकी विधिमें मामूली-सा मतभेद है ॥९३॥

आगे दो श्लोकोंके द्वारा प्रणामके भेद कहते हैं—

मन, वचन और कायकी अपेक्षा प्रणामके तीन भेद हैं, क्योंकि अर्हन्त सिद्ध आदिके ज्ञानादि गुणोंका कीर्तन मन वचन काय तीनोंके द्वारा किया जाता है। उनमें-से शारीरिक प्रणामके पाँच प्रकार हैं—मस्तकका नम्र होना एकांग प्रणाम है। दोनों हाथोंका नम्र होना दोअंग प्रणाम है। दोनों हाथोंका मस्तकके साथ नम्र होना तीन अंगी प्रणाम है। दोनों हाथों

---

१ 'एकद्वित्रिचतुःपञ्चदेहांशप्रतेर्मतः । प्रणामः पञ्चधा देवैः पादानतनरामरैः ।
एकाङ्गः शिरसो नामे सद्व्यङ्गः करयोर्द्वयोः । त्रयाणां मूर्द्धहस्तानां सत्र्यङ्गो नमने मतः ॥
चतुर्णां करजानूनां नमने चतुरङ्गकः । करमस्तकजानूनां पञ्चाङ्गः पञ्चकः (?) नते ॥'
—अमित. श्रा. ८।६२-६४।

२ चतुरावर्तत्रितयश्चतुः प्रणामः स्थितो यथाजातः ।
सामयिको द्विनिषद्यस्त्रियोगशुद्धस्त्रिसन्ध्यमभिवन्दी ॥—रत्नकरण्डश्रा., १३९ श्लो. ।

करजानुविनामेऽसौ चतुरङ्गो मनीषिभि. ।
करजानुशिरोनामे पञ्चाङ्ग. परिकीर्त्यते ॥
प्रणाम: कायिको ज्ञात्वा पञ्चधेति मुमुक्षुभिः । ३
विधातव्यो यथास्थानं जिनसिद्धादिवन्दने ॥' [ ] ॥९५॥

अथ क्रियाप्रयोगविधि नियमयन्नाह—

कालुष्यं येन जातं तं क्षमयित्वैव सर्वत. । ६
सङ्गाच्च चिन्तां व्यावर्त्य क्रिया कार्या फलार्थिना ॥९६॥

कालुष्य—क्रोधाद्यावेशवशाच्चित्तस्य क्षोभ. । येनेति करणे सहार्थे वा तृतीया । यथाह—

'येन केनापि संपन्नं कालुष्य दैवयोगत. । ९
क्षमयित्वैव तं त्रेधा कर्तव्यावश्यकक्रिया ॥' [ ] ॥९६॥

अथ अमलमिति विशेषण व्याचष्टे—

दोषैर्द्वात्रिंशता स्वस्य यद्व्युत्सर्गस्य चोज्झितम् । १२
त्रियोगशुद्धं क्रमवन्निर्मलं चितिकर्म तत् ॥९७॥

स्वस्य देववन्दनात्मनो । दोषै.—अनादृतादिभि । व्युत्सर्गस्य—कायोत्सर्गस्य । दोषै.—घोटकादिभि. । क्रमवत्—प्रशस्तक्रमम् । क्रमविशुद्धमित्यर्थ. । चितिकर्म—चितेस्तीर्थकरत्वादिपुण्यार्जनस्य कर्म १५ क्रिया जिनादिवन्दनेत्यर्थ ॥ उक्तं च—

'दुओणदं जहाजादं वारसावत्तमेव य ।
चदुस्सिरं तिसुद्धं च किदियम्म पउज्जदे ॥ १८
तिविहं तियरणसुद्ध मयरहिय दुविहट्ठाण पुणरुत्तं ।
विणएण कमविसुद्धं किदियम्मं होदि कायव्व ॥' [मूलाचार गा ६०१–२]

और दोनों घुटनोंका नम्र होना चार अगी प्रणाम है । दोनों हाथोंको मस्तकसे लगाकर दोनों घुटनोंके साथ नम्र होना पंचांगी प्रणाम है । अर्थात् शरीरके एक अंग मस्तक, दो अंग दोनों हाथ, तीन अंग दोनों हाथ और मस्तक, चार अग दोनों हाथ और दोनों घुटने तथा पाँच अंग दोनों हाथ मस्तकसे लगाकर दोनों घुटनोंको भूमिसे लगाना ये एकाग, दो अंग, तीन अंग, चार अंग और पंचांग प्रणाम हैं । यह शारीरिक प्रणाम कृतिकर्म करनेवाले यथास्थान करते हैं ॥९४-९५॥

आगे कृतिकर्मके प्रयोगकी विधि बताते है—

कर्मोंकी निर्जरारूप फल और तीर्थंकरत्व आदि पुण्यका उपार्जन करनेके इच्छुक मुमुक्षुको जिसके साथ क्रोध आदिके आवेशसे चित्तको क्षोभ उत्पन्न हुआ हो उससे क्षमा कराकर तथा समस्त परिग्रहसे मनको हटाकर कृतिकर्म करना चाहिए ॥९६॥

पहले इसी अध्यायके ७८वें श्लोकमे कृतिकर्मको अमल कहा है उस अमल विशेषणको स्पष्ट करते हैं—

जो अपने बत्तीस दोषोंसे और कायोत्सर्ग सम्बन्धी दोषोंसे रहित हो, मन-वचन-कायकी शुद्धिको लिये हो, क्रमसे विशुद्ध हो, उसे पूर्वाचार्य निर्मल चितिकर्म कहते हैं ॥९७॥

विशेषार्थ—जिन आदिकी वन्दनासे पुण्यकर्मका अर्जन होता है इसलिए उसे चितिकर्म भी कहते है । जो चितिकर्म अपने बत्तीस दोषोंसे तथा कायोत्सर्ग सम्बन्धी दोषोंसे रहित होता है, मन-वचन-कायकी शुद्धिपूर्वक होता है और जिसमें क्रमभंग नहीं होता,

'किदियम्म पि कुणतो ण होदि-किदियम्मणिज्जराभागी ।
बत्तीसाणण्णदर साहुट्ठाण विराहंतो ।।' [मूलाचार गा ६०८] ।।९७।।

३ अथ चतुर्दशभि श्लोकैर्द्वात्रिंशद् वन्दनादोषाल्लक्षयति—

अनादृतमतात्पर्यं वन्दनायां मदोद्धृतिः ।
स्तब्धमत्यासन्नभाव प्रविष्टं परमेष्ठिनाम् ।।९८।।
६ हस्ताभ्यां जानुनोः स्वस्य सस्पर्श. परिपीडितम् ।
दोलायितं चलन् कायो दोलावत् प्रत्ययोऽथवा ।।९९।।
भालेऽङ्कुशवदङ्गुष्ठविन्यासोऽङ्कुशितं मतम् ।
९ निषेदुषः कच्छपवद्रिङ्खा कच्छपरिङ्गितम् ।।१००।।
मत्स्योद्वर्तं स्थितिर्मत्स्योद्वर्तवत् त्वेकपार्श्वत. ।
मनोदुष्टं खेदकृतिर्गुर्वाद्युपरि चेतसि ।।१०१।।
१२ वेदिबद्धं स्तनोत्पीडो दोर्भ्यां वा जानुबन्धनम् ।
भयं क्रिया सप्तभयाद्विभ्यता बिभ्यतो गुरोः ।।१०२।।
भक्तो गणो मे भावीति वन्दारोर्ऋद्धिगौरवम् ।
१५ गौरवं स्वस्य महिमन्याहारादावथ स्पृहा ।।१०३।।

अनादृत—मल इति मध्यदीपकेन दोष इत्यन्तदीपकेन वा योज्यम् ।।९८।। दोलावत्—दोलायामिव दोलारूढस्येव वा । प्रत्यय । चलन्—इत्येव चलन्ती प्रतीतिः सशय इत्यर्थ ।।९९।। रिङ्खा—रिङ्खणम् ।
१८ कच्छपरिङ्गित—कूर्मवच्चेष्टितम् ।।१००।। मत्स्योद्वर्तवत् । एकपार्श्वत. स्थिति.—कटिभागोद्वर्तनेनाव-स्थानम् ।।१०१।। वेदिबद्धं—वेदिकावद्ध नाम दोष । स्तनोत्पीड —स्तनयो प्रपीडनम् । जानुबन्धन—

जिसके पश्चात् जो क्रिया करनी चाहिए वही क्रिया की जाती है वह कृतिकर्म निर्दोष माना गया है। मूलाचारमें कहा है—ग्रन्थ, अर्थ और दोनोंके भेदसे अथवा दो नति, बारह आवर्त और चार शिरके भेदसे, अथवा-कृत-कारित अनुमोदनाके भेदसे अथवा प्रतिक्रमण, स्वाध्याय और वन्दनाके भेदसे अथवा पचनमस्कार, ध्यान और चतुर्विंशतिस्तवके भेदसे कृति कर्मके तीन भेद हैं। मन-वचन-कायकी विशुद्धिसे युक्त अथवा दो नति बारह आवर्त और चतु.शिर क्रियासे विशुद्ध, जाति आदिके मदसे रहित, पर्यंक और कायोत्सर्ग रूपमे पुनरुक्त—जिसमे बार-बार वही क्रिया की जाती है, और जो क्रमसे विशुद्ध है ऐसे कृतिकर्मको विनयपूर्वक करना चाहिए। किन्तु यदि साधु बत्तीस दोषोंमे-से किसी भी एक दोषसे विराधना करता है तो वह साधु कृतिकर्म करते हुए भी कृतिकर्मसे होनेवाली निर्जराका अधिकारी नहीं होता ।।९७।।

आगे चौदह श्लोकोंके द्वारा बत्तीस दोषोंको कहते है—

समस्त आदर भावसे रहित वन्दना करना अनादृत नामक प्रथम दोष है। जाति आदिके भेदसे आठ प्रकारके मदसे युक्त होना स्तब्ध नामक दूसरा दोष है। अर्हन्त आदि परमेष्ठियोंके अतिनिकट होना प्रविष्ट नामका तीसरा दोष है ।।९८।।

अपने हाथोंसे घुटनोंका संस्पर्श करना परिपीडित नामक चतुर्थ दोष है। झूलनेकी तरह शरीरको आगे-पीछे करते हुए वन्दना करना दोलायित नामक पाँचवाँ दोष है। **अथवा** जिसकी स्तुति करता हो उसमें, स्तुतिमें अथवा उसके फलमे सन्देह होना **दोलायित** दोष है ।।९९।।

योगपट्टरूपेण । सप्तभयात्—मरणादिभयसप्तकाद् हेतो. । बिभ्यत. कर्म बिभ्यद्दोष इत्यर्थः ॥१०२॥ गण:—चातुर्वर्ण्यश्रमणसघः । भावी—भविष्यति । वन्दारोः—वन्दना साधुत्वेन कुर्वत. । गौरवं शेषगौरवमित्यर्थः ॥१०३॥

स्याद् वन्दने चोरिकया गुर्वादेः स्तेनितं मलः ।
प्रतिनीतं गुरोराज्ञाखण्डनं प्रतिकूल्यतः ॥१०४॥
प्रदुष्टं वन्दमानस्य द्विष्टेऽकृत्वा क्षमां त्रिधा । ६
तर्जितं तर्जनान्येषां स्वेन स्वस्याथ सूरिभिः ॥१०५॥
शब्दो जल्पक्रियाऽन्येषामुपहासादि हेलितम् ।
त्रिवलितं कटिग्रीवा हृद्भङ्गो भ्रुकुटिर्नवा ॥१०६॥ ९
करामर्शोऽथ जान्वन्तः क्षेपः शीर्षस्य कुञ्चितम् ।
दृष्टं पश्यन् दिशः स्तौति पश्यत्स्वन्येषु सुष्टु वा ॥१०७॥

अपने मस्तकपर अकुंशकी तरह अँगूठा रखकर वन्दना करना अंकुशित नामका छठा दोष है। वन्दना करते समय बैठे-बैठे कछुएकी तरह सरकना, कटिभागको इधर-उधर करना कच्छपरिंगित नामका सातवाँ दोष है ॥१००॥

जैसे मछली एक पार्श्वसे उछलती है उसी तरह कटिभागको उचकाकर वन्दना करना मत्स्योद्वर्त नामक आठवाँ दोष है। गुरु आदिके ऊपर चित्तमें आक्षेप करना मनोदुष्ट नामक नौवाँ दोष है ॥१०१॥

वेदीके आकारमें दोनों हाथोंसे बायें और दायें स्तनप्रदेशोंको दबाते हुए वन्दना करना या दोनों हाथोंसे दोनों घुटनोंको बाँधते हुए वन्दना करना वेदिकाबद्ध नामक दसवाँ दोष है। सात प्रकारके भयोंसे डरकर वन्दना करना भय नामक ग्यारहवाँ दोष है। आचायके भयसे कृतिकर्म करना बारहवाँ बिभ्यत्ता नामक दोष है ॥१०२॥

चार प्रकारके मुनियोंका संघ मेरा भक्त बन जायेगा यह भावना रखकर वन्दना करनेवाले साधुके ऋद्धिगौरव नामक बारहवाँ दोष होता है। अपने माहात्म्यकी इच्छासे या आहार आदिकी इच्छासे वन्दना करना गौरव नामक चौदहवाँ दोष होता है ॥१०३॥

गुरु आदिकी चोरीसे छिपकर वन्दना करनेपर स्तेनित नामक पन्द्रहवाँ दोष होता है। प्रतिकूल वृत्ति रखकर गुरुकी आज्ञा न मानना प्रतिनीत नामक सोलहवाँ दोष है ॥१०४॥

लड़ाई-झगड़ेके द्वारा यदि किसीके साथ द्वेषभाव उत्पन्न हुआ हो तो मन, वचन, कायसे उससे क्षमा न माँगकर या उसे क्षमा न करके वन्दना करनेपर प्रदुष्ट नामक सतरहवाँ दोष है। अपनी तर्जनी अंगुलि हिला-हिलाकर शिष्य आदिको भयभीत करना अथवा आचार्य आदिके द्वारा अपनी तर्जना होना तर्जित नामक अठारहवाँ दोष है ॥१०५॥

वार्तालाप करते हुए वन्दना करना शब्द नामक उन्नीसवाँ दोष है। दूसरोंका उपहासादि करना या आचार्य आदिका वचनसे तिरस्कार करके वन्दना करना हेलित नामक बीसवाँ दोष है। मस्तकमे त्रिवली डालकर वन्दना करना इक्कीसवाँ त्रिवलित दोष है ॥१०६॥

विशेषार्थ—मूलाचार ७।१०८ की संस्कृत टीकामें शब्ददोषके स्थानमे पाठान्तर मानकर शाठ्य दोष भी गिनाया है। शठतासे अथवा प्रपंचसे वन्दना करना शाठ्य दोष है ॥१०६॥

कुंचित हाथोंसे सिरकास्पर्श करते हुए वन्दना करना अथवा दोनों घुटनोंके बीचमें

अदृष्टं गुरुदृग्मार्गत्यागो वाऽप्रतिलेखनम् ।
विष्टिः संघस्येयमिति धीः संघकरमोचनम् ॥१०८॥
उपध्याप्त्या क्रियालब्धमनालब्धं तदाशया ।
हीनं न्यूनाधिकं चूला चिरेणोत्तरचूलिका ॥१०९॥
मूको मुखान्तर्वन्दारोर्हुङ्काराद्यथ कुर्वतः ।
[1]दुर्दरो ध्वनिनान्येषां स्वेनच्छादयतो ध्वनीन् ॥११०॥
द्वात्रिंशो वन्दने गीत्या दोषः सुललिताह्वयः ।
इति दोषोज्झिता कार्या वन्दना निर्जरार्थिना ॥१११॥

द्विष्टे—कलहादिना द्वेषविषयीकृते । अकृत्वा क्षमा—स्वयं क्षन्तव्यमकृत्वा तमक्षमयित्वा वा । कृतापराधस्य मनसि क्षमामनुत्पाद्येत्यर्थः । तर्जना—प्रदेशनीपरावर्तनेन भयोत्पादनम् । सूरिभि.—आचार्यादिभि ॥१०५॥ जल्पक्रिया—वार्तादिकथनम् । उपहासादि । आदि शब्देनोद्घट्टनादि । भङ्ग—मोटनम् । भ्रकुटि—ललाटे वलित्रयकरणम् ॥१०६॥ करामर्श.—हस्ताभ्यां परामर्श । पश्यन् । यदित्यध्याहार्यम् । पश्यत्सु । अपश्यत्सु न स्तौमीति भाव । सुष्ठु वा । परेषु पश्यत्सु सोत्साह वन्दत इत्यर्थ ॥१०७॥ विष्टि—

सिर करके संकुचित होकर वन्दना करना बाईसवाँ कुंचित दोष है। दिशाकी ओर देखते हुए वन्दना करना दृष्टदोष है अथवा आचार्य आदिके देखते रहनेपर तो वन्दना ठीक करना अन्यथा दिशाकी ओर ताकना तेईसवाँ दृष्टदोष है ॥१०७॥

गुरुकी आँखोंसे ओझल होकर वन्दना करना अथवा प्रतिलेखना न करके वन्दना करना अदृष्ट दोष है। यह संघकी बडी जबरदस्ती है कि हठसे क्रिया करायी जाती है ऐसा भाव रखकर वन्दना करना पचीसवाँ संघकरमोचन नामक दोष है ॥१०८॥

विशेषार्थ—मूलाचार (७।१०९) की संस्कृत टीकामें संघको कर चुकाना मानकर वन्दना करनेको संघकर मोचन दोष कहा है। अमितगति श्रावकाचार (८।८३) में भी 'करदानं गणेर्मत्वा'से यही लक्षण किया गया है ॥१०८॥

उपकरण आदिके लाभ होनेसे आवश्यक क्रियाका करना आलब्ध नामक छब्बीसवाँ दोष है। उपकरण आदिकी इच्छासे आवश्यक क्रिया करना अनालब्ध नामका सत्ताईसवाँ दोष है। ग्रन्थ अर्थ और कालके प्रमाणके अनुसार वन्दना न करना हीन नामक अठाईसवाँ दोष है। वन्दनाको तो थोडे ही समयमें करना और उसकी चूलिकारूप आलोचना आदिमें बहुत समय लगाना उत्तरचूलिका नामक उनतीसवाँ दोष है ॥१०९॥

वन्दना करनेवाला मूककी तरह यदि मुखके ही भीतर पाठ करता है, जो किसीको सुनाई नहीं देता अथवा जो वन्दना करते हुए हुंकार या अंगुलि आदिसे संकेत करता है उसके मूक नामक तीसवाँ दोष होता है। अपनी आवाजसे दूसरोंके शब्दोंको दबाकर जो जोरसे वन्दना करता है उसके दर्दुर नामक इकतीसवाँ दोष होता है ॥११०॥

वन्दना करते समय पाठको गाकर पंचमस्वरसे पढना सुललित नामक बत्तीसवाँ दोष है। निर्जराके अभिलाषीको इस प्रकारके दोषोंसे रहित वन्दना करनी चाहिए। अथवा यहाँ 'इति' शब्द प्रकारवाची है। अतः क्रियाकाण्ड आदिमें कहे गये इस प्रकारके अन्य वन्दना-दोष भी त्यागने चाहिए। जैसे शिरको नीचा करके या ऊँचा करके वन्दना करना, मस्तकके

---

१ 'दर्दुरो' इति सम्यक् प्रतिभाति । तथा च 'मूग च दद्दुर चापि' इति मूलाचारे ७।११०।

हठात् कर्मविघापनम् ॥१०८॥ उपध्याप्त्या—उपकरणादिलाभेन । हीनं मात्राहीनत्वात् । चूला चिरेण—वन्दनां स्तोककालेन कृत्वा तच्चूलिकाभूतस्यालोचनादेर्महता कालेन करणम् ॥१०९॥ मूक.—मूकवो दोषः ॥११०॥ गीत्या—पञ्चमादिस्वरेण । इति प्रकारार्थोऽयम् । तेनैवं प्रकारा. क्रियाकाण्डाद्युक्ता. । शिरोनामोत्सङ्गपृष्ठोपरिकरभ्रमणगुर्वादिरगतो भूत्वा पाठोच्चारणादयोऽपि त्याज्या ॥१११॥ 3

अथैकादशभि. श्लोकै. कायोत्सर्गदोषान् द्वात्रिंशतं व्याचष्टे—

कायोत्सर्गमलोऽस्त्येकमुत्क्षिप्याङ्घ्रि वराश्ववत् । 6
तिष्ठतोऽश्वो मरुद्धूतलतावच्चलतो लता ॥११२॥
स्तम्भः स्तम्भाद्यवष्टम्य पट्टकः पट्टकादिकम् ।
आरुह्य मालो मालादि मूर्ध्नालम्ब्योपरि स्थितिः ॥११३॥ 9
शृङ्खलाबद्धवत् पादौ कृत्वा शृङ्खलितं स्थितिः ।
गुह्यं कराभ्यामावृत्य शबरीवच्छबर्यपि ॥११४॥
लम्बितं नमनं मूर्ध्नस्तस्योत्तरितमुन्नमः । 12
उन्नमय्य स्थितिर्वक्षः स्तनदावत्स्तनोन्नतिः ॥११५॥

ऊपर दोनों हाथोंको घुमाना, गुरुसे आगे होकर पाठका उच्चारण करना आदि । ऐसे सभी दोष त्यागने योग्य हैं ॥१११॥

विशेषार्थ—मूलाचारमें अन्तिम दोषका नाम चुलुलित है । संस्कृत टीकाकारने इसका संस्कृतरूप चुलुलित किया है और लिखा है—एक प्रदेशमें स्थित होकर हाथोंको मुकुलित करके तथा घुमाकर जो सबकी वन्दना करता है अथवा जो पंचम आदि स्वरसे वन्दना करता है उसके चुलुलित दोष होता है ॥१११॥

वायसो वायसस्येव तिर्यगीक्षा खलीनितम् ।
खलीनार्ताश्ववद्दन्तघृष्ट्योर्ध्वाधश्चलच्छिरः ॥११६॥
३ ग्रीवां प्रसार्यावस्थानं युगार्तगववद्युगः ।
मुष्टिं कपित्थवद् बद्ध्वा कपित्थः शीर्षकम्पनम् ॥११७॥
शिरःप्रकम्पितं संज्ञा मुखनासाविकारतः ।
६ मूकवन्मूकिताख्यः स्यादङ्गुलीगणनाङ्गुली ॥११८॥
भ्रूक्षेपो भ्रूविकारः स्याद् घूर्णनं मदिरार्तवत् ।
उन्मत्त ऊर्ध्वं नयनं शिरोधेर्बहुधाप्यधः ॥११९॥
९ निष्ठीवनं वपुस्पर्शो न्यूनत्वं दिगवेक्षणम् ।
मायाप्रायास्थितिश्चित्रा वयोपेक्षाविवर्जनम् ॥१२०॥

उठाकर कायोत्सर्ग करना उत्तरित नामक नौवाँ दोष है। शिशुको स्तन पिलानेवाली स्त्रीकी तरह छातीको ऊपर उठाकर कायोत्सर्ग करना स्तनोन्नति नामक दसवाँ दोष है ॥११५॥

विशेषार्थ—मूलाचारकी (७।१७१) संस्कृत टीकामें कायोत्सर्ग करते हुए अपने स्तनों-पर दृष्टि रखना स्तनदृष्टि नामक दोष कहा है। किन्तु अमितगति श्रावकाचारमें (८।९१) ऊपरकी तरह ही कहा है ॥११५॥

कायोत्सर्गमें स्थित होकर कौएकी तरह तिरछे देखना वायस नामक ग्यारहवाँ दोष है। तथा लगामसे पीडित घोड़ेकी तरह दाँत कटकटाते हुए सिरको ऊपर-नीचे करना खलीनित नामक बारहवाँ दोष है ॥११६॥

विशेषार्थ—वायस कौएको कहते हैं और खलीन लगामको कहते हैं।

जुएसे पीडित बैलकी तरह गरदनको लम्बी करके कायोत्सर्गसे स्थित होना युग नामक तेरहवाँ दोष है। कैथकी तरह मुट्ठी करके कायोत्सर्गसे खड़े होना कपित्थ नामक चौदहवाँ दोष है। कायोत्सर्गसे स्थित होकर सिर हिलाना शिरप्रकम्पित नामक पन्द्रहवाँ दोष है। कायोत्सर्गमें स्थित होकर गूँगेकी तरह मुख, नाकको विकृत करना मूक नामक सोलहवाँ दोष है। कायोत्सर्गसे स्थित होकर अँगुलीपर गणना करना अँगुली नामक सतरहवाँ दोष है ॥११७-११८॥

कायोत्सर्गसे स्थिर होकर भ्रुकुटियोंको नचाना भ्रूक्षेप नामक अठारहवाँ दोष है। शराबीकी तरह घूमते हुए कायोत्सर्ग करना घूर्णन नामक उन्नीसवाँ दोष है। गरदनको अनेक प्रकारसे ऊँचा उठाना ऊर्ध्वनयन नामक बीसवाँ दोष है। गरदनको अनेक प्रकारसे नमाना अधोनयन नामक इक्कीसवाँ दोष है ॥११९।

कायोत्सर्गमें स्थित होकर थूकना, खखारना आदि निष्ठीवन नामक बाईसवाँ दोष है। शरीरका स्पर्श करना वपुस्पर्श नामक तेईसवाँ दोष है। प्रमाणसे कम करना न्यूनता नामक चौबीसवाँ दोष है। दिशाओंकी ओर ताकना दिगवेक्षण नामक पचीसवाँ दोष है। मायाचारको लिये हुए विचित्र रूपसे कायोत्सर्ग करना जिसे देखकर आश्चर्य हो यह छब्बीसवाँ दोष है। वृद्धावस्थाके कारण कायोत्सर्ग छोड़ देना सत्ताईसवाँ दोष है ॥१२०॥

व्याक्षेपासक्तचित्तत्वं कालापेक्षाव्यतिक्रमः ।
लोभाकुलत्वं मूढत्वं पापकर्मैकसर्गता ॥१२१॥
योज्येति यत्नाद् द्वात्रिंशद्दोषमुक्ता तनूत्सृतिः । ३
सा हि मुक्त्यङ्गसद्ध्यानशुद्ध्यै शुद्धैव संमता ॥१२२॥

घोटकाख्यः । चलतः—कम्पमानस्य ॥११२॥ स्तम्भादि । आदिशब्देन कुड्यादि ॥११३॥ शबरी । दोषनामेदम् ॥११४॥ उन्नमः—उन्नमनम् । इन्नन्तादल् । स्तनदावत्—शिशोः स्तनदायिन्या स्त्रिया यथा ६ ॥११५॥ दन्तघृष्ट्या—दन्तकटकटायनेन सह ॥११६॥ युगार्तगववत्—स्कन्धारूढयुगस्य बलीवर्दस्य यथा ॥११७॥ अङ्गुली । दोषनामेदम् ॥११८॥ अध्यधः—अवस्तादपि ग्रीवाया नयनम् । एतौ ग्रीवोर्ध्वनयनं ग्रीवाधोनयनं चेति द्वौ दोषौ ॥११९॥ निष्ठीवनमित्यादि । अत्र उत्तरत्र च संज्ञा एव लक्षणानि स्पष्टत्वात् ९ ॥१२०॥ मूढत्वं—कृत्याकृत्याविवेचकत्वम् । एकसर्गः—उत्कृष्टोत्साहः ॥१२१॥ शुद्धैव । उक्त च—

'सदोषा न फलं दत्ते निर्दोषायास्तनूत्सृतेः ।
किं कूटं कुरुते कार्यं स्वर्णं सत्यस्य जातुचित् ॥' [ ] ॥१२२॥ १२

अथोत्थितोत्थितादिभेदभिन्नायाश्चतुर्विधायास्तनूत्सृतेरिष्टानिष्टफलत्वं लक्षयति—

सा च द्वयोष्टा सद्ध्यानादुत्थितस्योत्थितोत्थिता ।
उपविष्टोत्थिता चोपविष्टस्यान्यान्यथा द्वयी ॥१२३॥ १५

चित्तका इधर-उधर होना अट्ठाईसवाँ दोष है। समयकी अपेक्षासे कायोत्सर्गके विविध अंशोंमें कमी करना उनतीसवाँ दोष है। कायोत्सर्ग करते समय लोभवश आकुल होना तीसवाँ दोष है। कृत्य-अकृत्यका विचार न करना मूढ़ता नामक इकतीसवाँ दोष है। पापके कार्योंमें उत्कृष्ट उत्साह होना बत्तीसवाँ दोष है ॥१२१॥

विशेषार्थ—मूलाचारमें कायोत्सर्गके दोषोंकी संख्या कण्ठोक्त नहीं बतलायी है। दसों दिशाओंके अवलोकनको दस दोषोंमें लेनेसे संख्या यद्यपि पूरी हो जाती है। अमितगति श्रावकाचार (८।८८-९८) में उनकी संख्या बत्तीस गिनायी है। अन्तके कुछ दोष ग्रन्थकारने श्रावकाचारके अनुसार कहे हैं। मूलाचारमें तो उनके सम्बन्धमें कहा है—धीर पुरुष दुःखों-के विनाशके लिए कपटरहित, विशेषसहित, अपनी शक्ति और अवस्थाके अनुरूप कायोत्सर्ग करते हैं ॥१२१॥

इस प्रकार मुमुक्षुको प्रयत्नपूर्वक बत्तीस दोषोंसे रहित कायोत्सर्ग करना चाहिए। क्योंकि मुक्तिके कारण धर्मध्यान और शुक्लध्यानकी सिद्धिके लिए शुद्ध कायोत्सर्ग ही आचार्योंको मान्य है ॥१२२॥

कायोत्सर्गके उत्थितोत्थित आदि चार भेद हैं, उनके इष्ट और अनिष्ट फलको बतलाते हैं—

धर्मध्यान और शुक्लध्यानको लेकर कायोत्सर्गके दो भेद आचार्योंको मान्य हैं। खड़े होकर ध्यान करनेवालेके कायोत्सर्गको उत्थितोत्थित कहते हैं और बैठकर ध्यान करने-वालेके कायोत्सर्गको उपविष्टोत्थित कहते हैं। इसके विपरीत आर्त-रौद्रध्यानको लेकर

१. 'णिक्कूडं सविसेसं बलाणुरूवं वयाणुरूवं च ।
काओसग्गं धीरा करंति दुक्खक्खयट्ठाए ॥'—(७-१७४)

उत्थितस्य—उद्भीभूतस्य । अन्येत्यादि । उपविष्टस्योत्थितस्य चार्तरौद्रचिन्तनलक्षणाद्दुर्ध्यानादुपविष्टोपविष्टा च उत्थितोपविष्टा च द्वयी तनूत्सृतिरनिष्टानिष्टफलत्वादित्यर्थः । उक्तं च—

'त्यागो देहममत्वस्य तनूत्सृतिरुदाहृता ।
उपविष्टोपविष्टादिविभेदेन चतुर्विधा ॥ ३
आर्तरौद्रद्वयं यस्यामुपविष्टेन चिन्त्यते ।
उपविष्टोपविष्टाख्या कथ्यते सा तनूत्सृतिः ॥
धर्म्यशुक्लद्वयं यस्यामुपविष्टेन चिन्त्यते । ६
उपविष्टोत्थिता सन्तस्तां वदन्ति तनूत्सृतिम् ॥
आर्तरौद्रद्वयं यस्यामुत्थितेन विधीयते ।
तामुत्थितोपविष्टाख्यां निगदन्ति महाधियः ॥ ९
धर्म्यशुक्लद्वयं यस्यामुत्थितेन विधीयते ।
उत्थितोत्थितनामानं तां भाषन्ते विपश्चितः ॥' [अमि. श्रा. ८।५७-६१] ॥१२३॥

अथ कायममत्वापरित्यागिनोऽनशनव्रतस्यापि मुमुक्षोः स्वेष्टसिद्धिप्रतिबन्धं दर्शयति— १२

कायोत्सर्ग करनेवाला यदि बैठकर दुर्ध्यान करता है तो उसे उपविष्टोपविष्ट और खड़े होकर दुर्ध्यान करता है तो उसे उत्थितोपविष्ट कहते हैं ॥१२३॥

विशेषार्थ—यहाँ शुभ और अशुभ ध्यानको लेकर कायोत्सर्गके चार भेद किये हैं—उत्थितोत्थित, उपविष्टोत्थित, उत्थितोपविष्ट और उपविष्टोपविष्ट। इन चारोंका स्वरूप मूलाचारमें इस प्रकार कहा है—'जो खड़े होकर धर्मध्यान और शुक्लध्यानको ध्याता है उसके इस कायोत्सर्गको उत्थितोत्थित कहते हैं। उत्थितका अर्थ है खड़ा हुआ। ऐसा सम्यग्ध्यानी बाह्य रूपसे तो खड़ा ही है अन्तरंग रूपसे भी खड़ा है अतः उत्थितोत्थित है। जो खड़े होकर आर्त और रौद्रध्यानको ध्याता है उसके कायोत्सर्गको उत्थितोपविष्ट कहते हैं क्योंकि यद्यपि वह बाह्य रूपसे खड़ा है किन्तु अन्तरंगसे तो बैठा हुआ ही है। जो बैठकर धर्मध्यान या शुक्लध्यानको ध्याता है उसके कायोत्सर्गको उपविष्टोत्थित कहते हैं क्योंकि यद्यपि वह बाह्य रूपसे बैठा है किन्तु अन्तरंगसे खड़ा ही है। जो बैठकर आर्त-रौद्रध्यानको ध्याता है उसके कायोत्सर्गको उपविष्टोपविष्ट कहते हैं क्योंकि वह अन्तरंग और बाह्य दोनों हीसे बैठा है' ॥१२३॥

आगे कहते हैं कि शरीरसे ममत्व त्यागे विना उपवास करनेपर भी इष्टसिद्धि नहीं होती—

---

१. 'धम्मं सुक्कं च दुवे ज्झायदि झाणाणि जो ठिदो संतो ।
एसो काओसग्गो इह उट्ठिदउट्ठिदो णाम ॥
अट्टं रुद्दं च दुवे झायदि झाणाणि जो ठिदो संतो ।
एसो काओसग्गो उट्ठिदणिविट्ठिदो णाम ॥
धम्मं सुक्कं च दुवे झायदि झाणाणि जो णिसण्णो दु ।
एसो काओसग्गो उवट्ठिद उट्ठिदो णाम ॥
अट्टं रुद्दं च दुवे झायदि झाणाणि जो णिसण्णो दु ।
एसो काओसग्गो णिसण्णिदणिसण्णिदो णाम ॥'—मूलाचार-७।१७७-१८० ।

जीवद्देहममत्वस्य जीवत्याशाप्यनाशुषः
जीवदाशस्य सद्ध्यानवैधुर्यात्तत्पदं कुतः ॥१२४॥

अप्यनाशुषः—अनशनव्रतस्यापि ॥१२४॥ ३

अथातीचारविशुद्ध्यै क्रियाविशेषसिद्ध्यै वा यथोक्तकाल कायोत्सर्गं कृत्वा परतोऽपि शक्त्या तत्करणे न दोष. स्यात् । किं तर्हि । गुण एव भवेदित्युपदेशार्थमाह—

हृत्वाऽपि दोषं कृत्वाऽपि कृत्यं तिष्ठेत् तनूत्सृतौ । ६
कर्मनिर्जरणाद्यर्थं तपोवृद्ध्यै च शक्तितः ॥१२५॥

स्पष्टम् ॥१२५॥

अथ त्रियोगशुद्धे कृतिकर्मण्यधिकारिणं लक्षयति— ९

यत्र स्वान्तमुपास्य रूपरसिकं पूतं च योग्यासना—
ह्यप्रत्युक्तगुरुक्रमं वपुरनुज्येष्ठोद्धपाठं वचः ।
तत् कर्तुं कृतिकर्म सज्जतु जिनोपास्त्योत्सुकस्तात्त्विक. १२
कर्मज्ञानसमुच्चयव्यवसितः सर्वंसहो निःस्पृहः ॥१२६॥

उपास्या.—आराध्या. सिद्धादय. । पूतम् । एतेन त्रयमपि विशेष्टव्यम् । गुरुक्रमः—दीक्षा ज्येष्ठाना पुराक्रिया कुर्वतामानुपूर्व्यम् । योग्यासनादिभिरप्रयुक्तोऽनिराकृतोऽसौ येन तत्तथोक्तम् । अनुज्येष्ठोद्घपाठं— १५ ज्येष्ठानुक्रमेण प्रशस्तोच्चारणम् । उत्सुक.—सोत्कण्ठाभिलाषः । उक्त च—

जिसका शरीरके प्रति ममत्वभाव वर्तमान है अतएव जिसकी इहलोक सम्बन्धी आशाएँ भी जीवित हैं, वह यदि अनशन व्रत भी करे तो उसे मोक्ष पद कैसे मिल सकता है क्योंकि उसके धर्मध्यान और शुक्लध्यानका अभाव है ॥१२४॥

विशेषार्थ—सच्चा मुमुक्षु वही है जो संसार शरीर और भोगोसे विरक्त होता है। घर-बार छोड़कर साधु बन जानेपर भी यदि शरीरके प्रति आसक्ति है तो उसकी सासारिक अभिलाषाएँ मिटी नहीं हैं। ऐसी अवस्थामे उसका अनशन केवल कायक्लेश है। ऐसे व्यक्तिके धर्मध्यान सम्भव नहीं है तब उसे मोक्षकी प्राप्ति कैसे हो सकती है ? ॥१२४॥

आगे कहते हैं कि दोषोंकी विशुद्धिके लिए और क्रिया विशेषकी सिद्धिके लिए कायोत्सर्गका जितना काल कहा है उतने काल तक कायोत्सर्ग करनेके बाद भी यदि कायोत्सर्ग करता है तो उसमें कोई दोष नहीं है, बल्कि लाभ ही है—

दोषोंको दूर करनेके लिए और आवश्यक कृत्यके लिए कायोत्सर्ग करनेके बाद भी कर्मोंकी निर्जरा तथा संवरके लिए और तपकी वृद्धिके लिए शक्तिके अनुसार कायोत्सर्ग करना चाहिए ॥१२५॥

आगे मन-वचन-कायसे शुद्ध कृतिकर्मके अधिकारीका लक्षण कहते हैं—

जिस कृतिकर्ममें मन आराधनीय सिद्ध आदिके स्वरूपमे अतिशय अनुरागी होनेके साथ विशुद्ध भावोंसे युक्त होता है, शरीर बाह्य शुद्धिके साथ गुरुजनोंके द्वारा की जानेवाली पुरःक्रियाके क्रमका उल्लंघन न करके अपने योग्य आसन स्थान आदिको लिये हुए होता है, तथा वचन वर्ण पद आदिकी शुद्धिको लिये हुए होनेके साथ ज्येष्ठ जनोंके अनुक्रमसे प्रशस्त उच्चारणसे युक्त होता है, उस कृतिकर्मको करनेके लिए वही समर्थ होता है जो अर्हन्तकी उपासनाके लिए उत्सुक हो, परमार्थको समझता हो, शास्त्रोक्त क्रिया और आत्मज्ञान दोनोंमें

'स व्याधेरिव कल्पत्वे विदृष्टेरिव लोचने ।
जायते यस्य सन्तोषो जिनवक्तृविलोकने ॥
परीषहसहः शान्तो जिनसूत्रविशारदः ।
सम्यग्दृष्टिरनाविष्टो गुरुभक्तः प्रियंवदः ॥
आवश्यकमिदं धीरः सर्वकर्मनिसूदनम् ।
सम्यक् कर्तुमसौ योग्यो नापरस्यास्ति योग्यता ॥' [अमि. श्रा. ८।१९-२१]॥१२६॥

३

६

अथ मन्दमतिसुखप्रतिपत्तये क्रमवदिति विशेषणं विवृण्वन्नाह—

प्रेप्सुः सिद्धिपथं समाधिमुपविश्यावेद्य पूज्यं क्रिया-
मानम्यादिलयभ्रमत्रयशिरोनामं पठित्वा स्थितः ।
साम्यं त्यक्ततनुर्जिनान् समदृशः स्मृत्वावनम्य स्तवं
युक्त्वा साम्यवदुक्तभक्तिरुपविश्यालोचयेत् सर्वतः ॥१२७॥

९

उत्साहयुक्त हो, परीषह, उपसर्ग आदिको सह सकता हो तथा जिसे सांसारिक विषयोंकी अभिलाषा न हो ॥१२६॥

विशेषार्थ—कृतिकर्म करनेके योग्य कौन होता है उसमें क्या विशेषताएँ होनी चाहिए इसको यहाँ स्पष्ट किया है। उसका मन, वचन, काय पवित्र होना चाहिए। मनकी पवित्रताके लिए परिणामोंका विशुद्ध होना आवश्यक है। यदि मनमें भोगाकांक्षा है या अन्य सांसारिक कठिनाईयोंको दूर करनेका अभिप्राय है तो मन विशुद्ध नहीं हो सकता। उसके लिए निष्काम भावनासे अर्हन्त सिद्ध आदि उपासनीय पवित्र आत्माओंके स्वरूपमें मनका अत्यन्त अनुरागी होना चाहिए। यह अनुराग तभी होता है जब सांसारिक विषयोंके प्रति विरक्ति होती है। वचनकी शुद्धिके लिए जो पाठ पढ़ा जाये वह शुद्ध पढ़ा जाना चाहिए, उसमें अक्षर, पद आदिका उच्चारण शुद्ध हो, गुरुजनोंके साथ पढ़ना हो तो अपना बड़प्पन प्रकट करनेकी भावना नहीं होनी चाहिए। उनकी ज्येष्ठताको रखते हुए ही धीर-गम्भीर रूपमें पढ़ना चाहिए। शरीरकी शुद्धिके लिए बाह्य शुद्धि तो आवश्यक है ही, साथ ही अपनेसे आयुमें, ज्ञानमें, आचारमें जो ज्येष्ठ हैं उनको उच्चस्थान देते हुए ही अपने योग्य आसनपर बैठना चाहिए। साधुसंघमें सब साधु मिलकर कृतिकर्म करते हैं उसीको दृष्टिमें रखकर यह कथन है। इन तीन शुद्धियोंके सिवाय कृतिकर्मका अधिकारी वही होता है जिसकी दृष्टि कृतिकर्मके केवल बाह्य रूपपर ही नहीं होती किन्तु जो बाह्य क्रियाके साथ आत्मज्ञानकी ओर भी संलग्न होकर दोनोंका ही संग्रही होता है। इसीलिए उसे तात्त्विक होना चाहिए, तत्त्वको जाननेवाला-समझनेवाला होना चाहिए क्योंकि उसके बिना कोरे क्रियाकाण्डसे कोई लाभ नहीं है। जो ऐसा होता है वह निस्पृही तो होता ही है। तथा कृतिकर्मके अधिकारीको कृतिकर्म करते हुए कोई उपसर्ग-परीषह आदि आ जावे तो उसे सहन करनेकी क्षमता होनी चाहिए। कष्टसे विचलित होनेपर कृतिकर्म पूरा नहीं हो सकता। जिस-किसी तरह आकुल चित्तसे पूरा भी किया तो व्यर्थ ही कहा जायेगा ॥१२६॥

आगे मन्दबुद्धि जनोंको सरलतासे ज्ञान करानेके लिए कृतिकर्मकी क्रमविधि बतलाते हैं—

जो साधु या श्रावक मोक्षके उपायभूत रत्नत्रयकी एकाग्रतारूप समाधिको प्राप्त करना चाहते हैं उन्हें इस प्रकार कृतिकर्म करना चाहिए। सर्वप्रथम बैठकर पूज्य गुरु आदिसे

आवेद्य—चैत्यभक्तिकायोत्सर्गंकरोम्यहमित्यादिरूपेण सप्रश्रय विज्ञाप्य। आनम्य स्थित— शरीरावनतिं कृत्वा पुनरुद्भूतः सन्नित्यर्थः। आदित्यादि—आरम्भे समाप्तौ चावर्तत्रयानन्तरप्रयुक्तमेकं शिरोनमनं यत्रेत्यर्थ.। उक्तभक्तिः—पठितवन्दनाकल्प.। आलोचयेत्—'इच्छामि भते चेइयभत्ति काउस्सग्गो कओ तस्सालोचेउं' इत्यादि प्रसिद्धनिगदमुच्चारयस्तदर्थं मनसा विचिन्तयेत्। सर्वतः—सर्वासु भक्तिषु। ॥१२७॥ ३

अथ सम्यक् षडावश्यकानुष्ठातुश्चिह्ननिर्णयार्थमाह— ६

शृण्वन् हृष्यति तत्कथां घनरवं केकीव मूकैडतां
तद्गर्हेऽङ्गति तत्र यस्यति रसे वादीव नास्कन्दति।
क्रोधादीन् जिनवन्न वैद्यपतिवद् व्यत्येति कालक्रमं ९
निन्द्यं जातु कुलीनवन्न कुरुते कर्ता षडावश्यकम्॥१२८॥

तत्कथां—षडावश्यकवार्ताम्। मूकैडतां—मौनं बधिरत्वं च। अङ्गति—गच्छति। तद्गर्हे—स्वयं न गर्हते षडावश्यकं नाप्यन्येन गर्ह्यमाण शृणोतीत्यर्थ। यस्यति—प्रयतते। वादी—धातुवादी। जिनवत्—क्षीणकषायो यथा। कर्ता—साधुत्वेन कुर्वाण.। उक्तं च— १२

'तत्कथाश्रवणानन्दो निन्दाश्रवणवर्जनम्।
अलुब्धत्वमनालस्यं निन्द्यकर्मव्यपोहनम्॥ १५
कालक्रमाव्युदासित्वमुपशान्तत्वमार्जवम्।
विज्ञेयानीति चिह्नानि षडावश्यककारिणः॥' [ ] ॥१२८॥

सविनय नमस्कारपूर्वक निवेदन करना चाहिए कि मैं चैत्यभक्ति कायोत्सर्गको करता हूँ। फिर खड़े होकर आदि और अन्तमें तीन-तीन आवर्त और एक नमस्कारपूर्वक सामायिक दण्डकको पढ़े। अर्थात् सामायिक दण्डक प्रारम्भ करनेसे पहले तीन आवर्त पूर्वक एक नमस्कार करे और दण्डक समाप्त होनेपर भी तीन आवर्तपूर्वक एक नमस्कार करे। फिर कायोत्सर्गपूर्वक पंचपरमेष्ठीका स्मरण करे। फिर सामायिक दण्डककी तरह ही अर्थात् आदि-अन्तमें तीन-तीन आवर्त और एक नमस्कारपूर्वक 'थोस्सामि' इत्यादि स्तवदण्डकको पढकर वन्दना पाठ करे। फिर बैठकर 'इच्छामि भंते चेइयभत्तिकाउस्सग्गो कओ तस्स आलोचेअं' इत्यादि पढकर आलोचना करे॥१२७॥

सम्यक् रीतिसे छह आवश्यकोंको करनेवालेके चिह्नोंको बतलाते हैं—

जैसे मयूर मेघके शब्दको सुनकर नाचने लगता है वैसे ही छह आवश्यकोंका पालक भी छह आवश्यकोंकी चर्चा-वार्ता सुनकर आनन्दित होता है। यदि कोई उनकी निन्दा करता है तो गूँगा-बहरा हो जाता है अर्थात् न तो वह स्वयं छह आवश्यकोंकी निन्दा करता है और यदि दूसरा कोई करता है तो उसे सुनता भी नहीं है। तथा जसे धातुवादी पारेमें यत्नशील रहता है वैसे ही वह छह आवश्यकोंमें सावधान रहता है। तथा जैसे क्षीण कषाय, क्रोध आदि नहीं करता वैसे ही वह भी क्रोध आदि नहीं करता। तथा जैसे वैद्य रोगी और निरोगीके प्रति वैद्यक शास्त्रमे कहे गये काल और क्रमका उल्लंघन नहीं करता वैसे ही छह आवश्यकोंका पालक भी शास्त्रोक्त काल और विधिका उल्लंघन नहीं करता। तथा जैसे कुलीन पुरुष कभी भी निन्दनीय कार्य नहीं करता वैसे ही छह आवश्यकोंका पालक भी लोक और आगमके विरुद्ध कार्य नहीं करता॥१२८॥

अथ संपूर्णेतरषडावश्यकसम्यग्विधाने पुरुषस्य निःश्रेयसाभ्युदयप्राप्तिं फलतयोपदिशति—

समाहितमना मौनी विधायावश्यकानि ना ।

संपूर्णानि शिवं याति सावशेषाणि वै दिवम् ॥१२९॥

ना—द्रव्यतः पुमानेव । सावशेषाणि—कतिपयानि हीनानि च अशक्त्यपेक्षयैतत् । यद्वृद्धाः—

'जं सक्कइ तं कीरइ जं च ण सक्कइ तं च सद्दहणं ।

सद्दहमाणो जीवो पावइ अजरामरट्ठाणं ॥' [ ]

वै—नियमेन । उक्तं च—

'सर्वैरावश्यकैर्युक्तो सिद्धो भवति निश्चितम् ।

सावशेषैस्तु संयुक्तो नियमात् स्वर्गगो भवेत् ॥' [ ] ॥१२९॥

अथ षडावश्यकक्रिया इव सामान्या अपि क्रिया नित्यं साधुना कार्या इत्युपदिशति—

आवश्यकानि षट् पञ्च परमेष्ठिनमस्क्रियाः ।

निःसही चासही साधोः क्रियाः कृत्यास्त्रयोदश ॥१३०॥

स्पष्टम् ॥१३०॥

अथ भावतो अर्हदादिनमस्कारपञ्चकस्य फलमाह—

योऽर्हत्सिद्धाचार्याध्यापकसाधून् नमस्करोत्यर्थात् ।

प्रयतमतिः खलु सोऽखिलदुःखविमोक्षं प्रयात्यचिरात् ॥१३१॥

स्पष्टम् ॥१३१॥

अथ निसह्यसहीप्रयोगविधिमाह—

वसत्यादौ विशेत् तत्स्थं भूतादिं निसहीगिरा ।

आपृच्छ्य तस्मान्निर्गच्छेत्तं चापृच्छ्यासहीगिरा ॥१३२॥

आपृच्छ्य—संबोध्य । उक्तं च—

'वसत्यादिस्थभूतादिमापृच्छ्य निसहीगिरा ।

वसत्यादौ विशेत्तस्मान्निर्गच्छेत् सोऽसहीगिरा ॥' [ ] ॥१३२॥

आगे सम्पूर्ण छह आवश्यकोंका सम्यक् पालन करनेवालेको मोक्षकी और एकदेश पालन करनेवालेको अभ्युदयकी प्राप्तिरूप फल बतलाते हैं—

एकाग्रचित्त और मौनपूर्वक सामायिक आदि सम्पूर्ण आवश्यकोंका सम्यक् रीतिसे पालन करनेवाला पुरुष मोक्ष जाता है और अशक्त होनेके कारण कुछ ही आवश्यकोंका सम्यक् रीतिसे पालन करनेवाला महर्धिक कल्पवासी देव होता है ॥१२९॥

आगे कहते हैं कि साधुको छह आवश्यक क्रियाओंकी तरह सामान्य क्रिया भी नित्य करनी चाहिए—

छह आवश्यक, पाँच परमेष्ठियोंको नमस्कार रूप पाँच, एक निःसही और एक आसही ये तेरह क्रियाएँ साधुको करनी चाहिए ॥१३०॥

भावपूर्वक अर्हन्त आदि पाँचको नमस्कार करनेका फल बतलाते हैं—

जो प्रयत्नशील साधु या श्रावक अर्हन्त, सिद्ध, आचार्य, उपाध्याय और साधुको भावपूर्वक नमस्कार करता है वह शीघ्र ही चार गति सम्बन्धी सब दुःखोंसे छूट जाता है ॥१३१॥

आगे निःसही और असहीके प्रयोगकी विधि बतलाते हैं—

मठ, चैत्यालय आदिमें रहनेवाले भूत, यक्ष आदिको निःसही शब्दके द्वारा पूछकर

अथ परमार्थतो निसह्यसह्यौ लक्षयति—

आत्मन्यात्मासितो येन त्यक्त्वा वाऽऽशास्य भावतः ।
निसह्यसह्यौ स्तोऽन्यस्य तदुच्चारणमात्रकम् ॥१३३॥ ३

आसितः—स्थापितः । सितो वा बद्धः । अन्यस्य—बहिरात्मनः । आशावतश्च । उक्तं च—

'स्वात्मन्यात्मा सितो येन निषिद्धो वा कषायतः ।
निसही भावतस्तस्य शब्दोऽन्यस्य हि केवलः ॥ ६
आशा यस्त्यक्तवान् साधुरसही तस्य भावतः ।
त्यक्ताशा येन नो तस्य शब्दोच्चारो हि केवलः ॥' [ ] ९

अथवा—

'निषिद्धचित्तो यस्तस्य भावतोऽस्ति निषिद्धिका ।
अनिषिद्धस्य तु प्रायः शब्दतोऽस्ति निषिद्धिका ॥ १२
आशया विप्रमुक्तस्य भावतोऽस्त्यासिका मता ।
आशया त्ववियुक्तस्य शब्द एवास्ति केवलम् ॥' [ ] ॥१३३॥

अथ प्रकृतमुपसंहरन्नित्यनैमित्तिककृतिकर्मप्रयोगं नियमयन्नाह— १५

इत्यावश्यकनिर्युक्ता उपयुक्तो यथाश्रुतम् ।
प्रयुञ्जीत नियोगेन नित्यनैमित्तिकक्रियाः ॥१३४॥

आवश्यकनिर्युक्तौ—आवश्यकाना निरवशेषोपाये । **यथाश्रुतं**—कृतिकर्मशास्त्रस्य गुरुपर्वक्रमायातोपदेशस्य चानतिक्रमेण । **नियोगेन**—नियमेन । **नित्येत्यादि**—नित्यक्रियाश्च नैमित्तिकक्रियाश्चेति विगृह्य प्रथमक्रियाशब्दस्य गतार्थत्वादप्रयोगः । इति भद्रम् ॥१३४॥ १८

इत्याशाधरदृब्धाया धर्मामृतपञ्जिकायां ज्ञानदीपिकापरसंज्ञायामष्टमोऽध्यायः ।

अत्राध्याये ग्रन्थप्रमाणं पञ्चसप्तत्यधिकानि षट्शतानि । अकत. ६७५ । २१

प्रवेश करना चाहिए और 'आसही' शब्दके द्वारा उससे पूछकर ही वहाँसे बाहर जाना चाहिए ॥१३२॥

आगे परमार्थ दृष्टिसे निसही और आसहीका अर्थ बतलाते हैं—

जिस साधुने अपने आत्माको अपने आत्मामें ही स्थापित किया है उसके निश्चयनयसे निसही है । तथा जिसने इस लोक आदिकी अभिलाषाओंको त्याग दिया है उसके निश्चयनयसे आसही है । किन्तु जो बहिरात्मा है और जिन्हें इस लोक आदि सम्बन्धी आशाओंने घेरा हुआ है उनका निसही और आसही कहना तो शब्दका उच्चारण मात्र करना है ॥१३३॥

अन्तमें प्रकृत विषयका उपसंहार करते हुए साधुओंको नित्य और नैमित्तिक कृतिकर्मको करनेकी प्रेरणा करते हैं—

उक्त प्रकारसे आवश्यकोंके सम्पूर्ण उपायोंमें सावधान साधुको कृतिकर्मका कथन करनेवाले शास्त्र तथा गुरुपरम्परासे प्राप्त उपदेशके अनुसार नियमसे नित्य और नैमित्तिक क्रियाओंको करना चाहिए ॥१३४॥

इस प्रकार आशाधर विरचित स्वोपज्ञ धर्मामृतके अन्तर्गत अनगारधर्मामृतकी भव्यकुमुदचन्द्रिका-टीका तथा ज्ञानदीपिका पंजिका अनुसारिणी हिन्दी टीकामें आवश्यक-निर्युक्ति नामक अष्टम अध्याय समाप्त हुआ ।

नवम अध्याय

अथ चतुश्चत्वारिंशता पद्यैर्नित्यक्रियाप्रयोगविधौ मुनिमुद्यमयन्नाह—

शुद्धस्वात्मोपलम्भाग्रसाधनाय समाधये ।
परिकर्म मुनिः कुर्यात् स्वाध्यायादिकमन्वहम् ॥१॥

परिकर्म—योग्यतोत्पादनाय प्राग्विधेयमनुष्ठानम् ॥१॥

अथ स्वाध्यायप्रतिष्ठापननिष्ठापनयोर्विधिमुपदिशति—

स्वाध्यायं लघुभक्त्यात्तं श्रुतसूर्योरहर्निशे ।
पूर्वेऽपरेऽपि चाराध्य श्रुतस्यैव क्षमापयेत् ॥२॥

लघुभक्त्या—लघ्वी अञ्चलिकामात्रपाठरूपा भक्तिर्वन्दना । सा च श्रुतस्य यथा—'अर्हद्वक्त्रप्रसूतम्' इत्यादिका । एवमाचार्यादीनामपि यथाव्यवहारमसाववसेया । आत्त—गृहीत प्रतिष्ठापितमित्यर्थ । अहर्निशे—दिने रात्रौ च । पूर्वेऽपरेऽपि—पूर्वाह्लेऽपराह्ले पूर्वरात्रेऽपररात्रे चेत्यर्थ. । एतेन गोसर्गिकापराह्णिकप्रादोषिक-वैरात्रिकाश्चत्वार स्वाध्याया इत्युक्त स्यात् । यथाह—

'एकः प्रादोषिको रात्रौ द्वौ च गोसर्गिकस्तथा ।
स्वाध्याया. साधुभि सार्द्धं[1] कर्तव्या सन्त्यतन्द्रितैः ।' [ ]

आगे चवालीस श्लोकोंके द्वारा मुनियोंको नित्य क्रियाके पालनकी विधिमें उत्साहित करते हैं—

निर्मल निज चिद्रूपकी प्राप्तिका प्रधान कारण समाधि है। उस समाधिके लिए योग्यता प्राप्त करनेको मुनिको प्रतिदिन स्वाध्याय आदि करना चाहिए ॥१॥

विशेषार्थ—संसारका परित्याग करके मुनिपद धारण करनेका एकमात्र उद्देश शुद्ध स्वात्माकी उपलब्धि है उसे ही मोक्ष कहते हैं। कहा भी है—'सिद्धिः स्वात्मोपलब्धि.'। किन्तु उस निर्मल चिद्रूपकी प्राप्तिका प्रधान कारण है समाधि। समाधि कहते हैं आत्मस्वरूपमें अपनी चित्तवृत्तिका निरोध। उसे योग और ध्यान भी कहते है। सब ओरसे मनको हटाकर स्वरूपमें लगाये विना सच्चा ध्यान सम्भव नहीं है और उसके विना स्वरूपकी प्राप्ति सम्भव नहीं है। किन्तु वैसा ध्यान अभ्याससे ही सम्भव है। उस प्रकारका ध्यान करनेकी योग्यता लानेके लिए पहले कुछ आवश्यक कार्य करने होते है। उन्हींको कहते है ॥१॥

सबसे प्रथम स्वाध्यायके प्रारम्भ और समापनकी विधि कहते हैं—

स्वाध्यायका प्रारम्भ दिन और रात्रिके पूर्वभाग और अपरभागमें लघु श्रुत भक्ति और लघु आचार्य भक्तिका पाठ करके करना चाहिए। और विधिपूर्वक करके लघु श्रुत भक्तिपूर्वक समाप्त करना चाहिए ॥२॥

---

१. -मि सर्वे क—भ कु च ।

प्रदोष प्रत्यासन्नकाल: । प्रदोषोऽपराह्णस्तत्र भव: प्रादोषिक अपराह्णिक इत्यर्थ. । आराध्य—विधिवद् विधाय । क्षमापयेत्—लघ्व्या श्रुतभक्त्या निष्ठापयेदित्यर्थ. ॥२॥

अथ स्वाध्यायाना ग्रहण-क्षमापण-कालेयत्तानिरूपणार्थमाह— ३

ग्राह्यः प्रगे द्विघटिकादूर्ध्वं स प्राक्ततश्च मध्याह्ने ।
क्षम्योऽपराह्णपूर्वापररात्रेष्वपि दिगेषैव ॥३॥

ग्राह्य.—प्रतिष्ठाप्य. । प्रगे—प्रभाते । द्विघटिकात्—द्वयोर्घटिकयो: समाहारो द्विघटिकं तस्मात् । ६ प्राक् तत'—घटिकाद्वयात् पूर्वं, घटिकाद्वयोने मध्याह्ने सम्पन्ने सतीत्यर्थ. । अपराह्णेत्यादि–अपराह्णे घटिकाद्वयाधिकमध्याह्नादूर्ध्वं प्रतिष्ठाप्यो घटिकाद्वयशेषे दिनान्ते निष्ठाप्य । तथा घटिकाधिके प्रदोषे ग्राह्यो घटिकाद्वयहीनेऽर्धरात्रे निष्ठाप्य । तथा घटिकाद्वयाधिकेऽर्धरात्रे ग्राह्यो द्विघटिकावशेषे निशान्ते क्षम्य इत्यर्थ. ॥३॥ ९

अथ स्वाध्यायं लक्षयित्वा विधिवत्तद्विधानस्य फलमाह—

सूत्रं गणधराद्युक्तं श्रुतं तद्वाचनादय ।
स्वाध्यायः स कृत. काले मुक्त्यै द्रव्यादिशुद्धितः ॥४॥ १२

सूत्रमित्यादि । उक्तं च—

'सुत्तं गणहरकथिदं तहेव पत्तेयबुद्धकथिदं च ।
सुदकेवलिणा कथिद अभिन्नदसपुव्विकथिदं च ॥ १५
तं पढिदुमसज्झाए ण य कप्पदि विरदि इत्थिवग्गस्स ।
एत्तो अण्णो गंथो कप्पदि पढिदुं असज्झाए ॥
आराधणणिज्जुत्ती मरणविभत्ती असग्गहत्थुदीओ । १८
पच्चक्खाणावासय धम्मकहाओ य एरिसओ ॥' [मूलाचार गा. २७७–२७९]

विशेषार्थ—आगममें स्वाध्यायके चार समय माने हैं—पूर्वाह्न, अपराह्न, पूर्व रात्रि और अपररात्रि । इन चार कालोंमें साधुको आलस्य त्यागकर स्वाध्याय करना चाहिए। स्वाध्यायके प्रारम्भमें लघु श्रुत भक्ति और लघु आचार्य भक्ति करना चाहिए। और समाप्तिपर लघु श्रुतभक्ति पढना चाहिए ॥२॥

आगे स्वाध्यायके प्रारम्भ और समाप्तिके कालका प्रमाण बताते है—

